Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

श्रीशः शरणम्

मधुरवाणी.

सुधानिष्यन्दिन्या मधुरमधुरालापकलया
खलावज्ञामूर्च्छाभरमपहरन्ती सुरगिरः ।
मनोज्ञालङ्कारा रसिकजनचेतांसि सहसा
वशीकुर्वाणेयं भुवि मधुरवाणी विजयते ॥

८ वर्षे] १८६४ शाक कार्तिक-मार्गशीर्ष मासयोः [१-२ सञ्चिके

राधाधरमधुस्यन्दमिलिन्दाय मधुद्विषे ।
कृष्णापटकुविन्दाय गोविन्दाय नमोऽस्तु नः ॥

मङ्गलम्

दृष्ट्वा मीलितलोचनां निशि रहो व्यत्यस्तवस्त्रां प्रियाम्
मन्दं मन्दमुपेत्य नाभिकुहरे चक्रे नखैरङ्कनम् ।
उद्बुद्धां सहसोत्थितां च चकितां स्मेराननो राधिकाम्
आश्लिष्यन् पिबतिस्म योऽधरसुधां कृष्णोऽस्तु सश्रेयसे ॥१॥

सुप्तं वीक्ष्य गजाननं शिशुमुमा पार्श्वे विनिद्रं शिवम्
क्रीडालोलमना गिरीशहृदयं यावत्समारोहति ।
शुण्डाग्रेण तदैव मातरमसौ कर्षन् रुदन् उत्थितः
लज्जानम्रमुखी हरेण हसता दृष्टा शिवायास्तु नः ॥२॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

गणेशस्तुतिः

न दुःखं न पीडा भवत्याश्रितानां सदा भाग्यवृद्धिस्सुबुद्धिर्महद्भिः ।
नचाधिर्न बाधा गणाधीश! पादारविन्दं सदा ते हृदा भावयामि ॥३॥
स्तनं पातुमिच्छन् गजास्योद्रिपुत्र्या गजास्यान्न तं प्राप रोषेण हस्तात् ।
चकर्ष श्रुतिस्थं तदा कर्णिकारं तदालोक्य शम्भुर्जहासातिहर्षात् ॥४॥

श्रीनगरस्थ (काश्मीर) विद्वत्परिषन्मन्त्रिणो विद्यावारिधेः
श्रीविश्वनाथशास्त्रिणः ।

श्रीकामेश्वरीलहरी

क. तेक्कुञ्जशङ्करभट्टः प्रधानाध्यापकः अम्मेम्बलसोमनाथसंस्कृतविद्यालये
कुर्नाडु द. कन्नड

त्वदापाङ्गालोकं भजति मनुजो याति विभुतां
त्वदीयाभिर्भाभिर्भवति निखिलो लोकनिवहः ।
त्वदन्यं दातारं न हि जगति पश्यामि सुलभं
ततस्ते पादाब्जे शरणमनुयास्यामि शिवदे ! ॥ १ ॥
यदा भूम्यां पद्भ्यं चरति रविसंपर्कवशत-
स्तदा साम्यं यायात्तव चरणयोरम्ब ! सुखदे ! ।
त्वदीयं श्रीजङ्घायुगलमतिकाठिन्यरहितं
ततोऽयं तत्तत्त्वं कथयतु कथं कर्कशवचाः ॥ २ ॥
सदा सक्थ्नोरीषद्भजति करिहस्तोऽपि तुलनां
न मन्ये रम्भाऽपि प्रथितपरमार्थैकनिलये ! ।
यतो जाता जातिस्तरति पणनाकार्यविधये
दुरापं तारङ्गं जलधिमहहाऽनन्दभरिते ! ॥ ३ ॥
नितम्बो बिम्बं ते जयति शशिनश्चारु रहितं
ततस्तस्मिन्नङ्कः श्रयत इति मे बुद्धिरनिशम् ।
यदीयं सौन्दर्यं भजति मनसाऽनन्यविषय-
स्तदाऽसौ काव्यानां चरति सरणिं चारुचरिते ! ॥ ४ ॥
कटिं दृष्ट्वा सिंहो वहति तव साम्यत्वकल्या
न चेदं मध्यं वा कथमयति दारिद्र्यपदवीम् ? ।
विरूपाक्षो रूपं सततमनुसन्धाय भजते ।
तवाऽयं दृक्पातो धरति भवसिन्धौ सुमनसम् ॥ ५ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

समत्वगीतम्

प्रथमोऽध्यायः

श्रीशंकराचार्य (डा. कुर्तकोटि) विरचितम्

स्मारं स्मारं स्मरणविलसत्सच्चिदानन्दरूपं
श्रावं श्रावं श्रवणविहरत्स्वादु नामाऽपि तस्य ।
सर्वत्राऽपि प्रदिशति समं तं ततो या समत्वं
तद्गीतां तां सदुपनिषदं साम्यसारां निषेवे ॥ १ ॥

यो जगौ जगदसाम्यसंगसंच्छेदिबोधमधुरस्वरा गिरः ।
तस्य पश्यदमृतत्वदा सदा गीतिमूर्तिरमृतायिता हिता ॥२॥

जन्माद्यस्य यतोऽखिलस्य जगतः स प्रादुरासीत्समो
वैषम्यातिशयापनोदनकृते भूयो भुवीह स्वयम् ।
जन्वानन्दमयः स मूर्तकृपया देहीव मूर्त्याऽपि सन्
यस्याऽस्ति प्रकृतिर्वशे प्रभुरसौ न प्राकृतः पूरुषः ॥ ३ ॥

स आत्मप्रकाशः स सर्वप्रवेशः स कारुण्यसिन्धुः स चाऽनाथबन्धुः ।
स एवाऽयमीड्यो हृतस्मर्तृजाड्यो वरेण्यः शरण्यः प्रणम्यः सुरम्यः ॥४॥

विभातु लोकोद्धृतये दधद्वपुर्न पूरुषोऽसौ पुरुषोत्तमोऽच्युतः ।
सरोनिमज्जत्पतितेहिधीर्षया जलेऽवतीर्णः पतितो न मन्यते ॥ ५ ॥

यत्तत्त्वं परमात्मनः किमपि तन्नन्वप्रमेयं परं
श्रीरामाद्यवतारकृत्प्रभुरसौ भक्ताभयोद्यत्करः ।
बीजं नाम सुसूक्ष्ममस्तु सुमहान् वृक्षो हि सान्द्रो वट-
श्छायामन्त्रितपान्थ आश्रितवतस्तापाद् भृशं रक्षति ॥६॥

कृतावतारो भगवान् यदोः कुले यदा स लोकानुजिघृक्षया पुरा ।
तदाऽऽदिदेशार्जुनसुप्रसंगतः समत्वतत्त्वं जगतीहितोचितम् ॥ ७ ॥

उदितो हि महारणाङ्गणे वदनात्तस्य च पार्थसारथेः ।
उपदेशविशेष एष यः स महाभारतभूषणायितः ॥ ८ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

उपदेशः स उपनिषत् सा पद्यमयी च भारते कथिता ।
भगवद्गीतेति ततः प्रायो गीतेति वा विदिता ॥ ९ ॥
तया च ग्रथितप्रायो गतो ग्रन्थस्तदाख्यताम् ।
परिमेयपदोऽप्येष नन्वमेयार्थनिर्गमः ॥ १० ॥
अथ बहुतिथकालात् सुप्रसिद्धाद्यभाष्यै-
रनुभवपरतर्कैः शङ्कराचार्यवर्यैः ।
प्रकटितविविधार्थैः सद्भिरन्यैश्च तैस्तै-
र्विलसति विवृतो हि ग्रन्थ एषोऽद्वितीयः ॥ ११ ॥
श्रुतिपथं गत एव स भूयसां श्रुतिमतामखिलेऽपि महीतले ।
समधिकार्थवतः सुयशस्विनः समदृशो न भवत्यगतिः क्वचित् ॥ १२ ॥
व्यत्यस्ततत्तत्स्थिरवस्तुभूत्यां सत्यामियत्यामपि कालगत्याम् ।
साम्यप्रदीपः स समप्रतापः प्रत्नं हि रत्नं न जहाति तेजः ॥ १३ ॥
केचित्तु मूलमात्रं निपठन्त्यपरेऽर्थमधिजिगांसन्ते ।
अर्थापयन्ति कतिचिद् व्याचिख्यासन्ति तं परे ग्रन्थम् ॥ १४ ॥
पाश्चात्यैः कैश्चिदाक्षिप्तं दूषणं विविधं पुनः ।
पुष्णात्येव प्रभां तस्य तृणं वह्नेः प्रदीप्तये ॥ १५ ॥
कृतास्तस्य व्याख्याः कृतिभिरमितैर्भिन्नमतिभि-
र्मिथो भिद्यन्ते ता इति तु न ततो भीतिरिह नः ।
समासाद्य सम्यग् जगति विषमेऽस्मिन् सममिति
क्षमः सन्देष्टुं यः स न किमयमत्रोपकुरुते ? ॥ १६ ॥
तादर्थ्यात्प्रथितो ग्रन्थो यथोपनिषदित्ययम् ।
तथोपनिषदोऽपीति तादृग्वाक्प्रचुरत्वतः ॥ १७ ॥
श्रीमद्भगवद्गीता उपनिषदो भारतात् पृथग् विधृताः ।
उपवर्णिता हि विद्या ब्रह्मण इति शास्त्रमिति च योगस्य ॥ १८ ॥

* समं ब्रह्म साक्षात् समत्वं च योगः
समाख्यायतात्र स्फुटं सिध्यतीदम् ।

---

* "निर्दोषं हि समं ब्रह्म" भ. गी.

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

समं वस्तु वेद्यं समत्वं च पाल्यं
समाधानमन्तर्बहिश्च स्वयं स्यात् ॥ १९ ॥
योगाभिधानमुचितं भजते समत्वं
तत्साधनं किमपि तत्पदयोजनार्हम् ।
ज्ञानादिनामसहितस्तत एव योगो
वैविध्यमेति फलतः स किलैकरूपः ॥ २० ॥
यस्य यः सुशकः पन्थाः समत्वायास्तु तस्य सः ।
समत्वमनुशास्त्येकं सर्वान् योगेश्वरः समः ॥ २१ ॥
योगेश्वरः स नूनं यथार्थसंज्ञः स एव योगश्च ।
योगेश्वरेण योगः सार्थो योगेश्वरो नु योगेन ॥ २२ ॥
समत्वात् परः को नु योगात् पुमर्थः स्वयं तत्र धर्मादयोऽन्तर्भवन्ति ।
जगद्धारणात् तत् समत्वं हि धर्मो दृढद्वन्द्वबन्धप्रहाणाच्च मोक्षः ॥२३॥
तद्धि प्रतिष्ठा जगतोऽस्य तस्मान्निःश्रेयसं चाभ्युदयश्च नृणाम् ।
*समत्वमेतत्तदत्तोऽस्ति धर्मस्तदच्युताराधनमप्युपात्तम् ॥ २४ ॥
दुःखात्यन्तनिवृत्तिः परमसुखप्राप्तिरिति च कथितोऽसौ ।
पुरुषार्थः समताया अर्थः शब्दान्तरव्यक्तः ॥ २५ ॥
आयुर्वेदे हि धातूनां "साम्यं प्रकृतिरुच्यते" ।
स्वरादीनां च साम्येन सङ्गीतं भवति प्रियम् ॥ २६ ॥
क्वचित्कायिकं वा क्वचिन्मानसं वा क्वचिद्वाचिकं वा क्वचिद्बौद्धिकं वा ।
क्वचित्तात्त्विकं वा क्वचिच्चार्थिकं तत् समत्वं समस्तं प्रशस्तं चकास्ति ॥२७॥
लोकेऽस्मिन् विषमे कुतोऽपि सदृशं नास्त्येव वस्तुद्वयं
प्रेर्यन्ते प्रसभं परं सहजया सर्वे समत्वेप्सया ।
ये नामाऽसुभृतः स्युरत्र विषये ते निर्विशेषाः पुन-
स्तिर्यञ्चो मनुजा जडा अथ बुधा इत्येष भेदोऽन्यतः ॥ २८ ॥
सर्वे यतन्ते समतैकहेतोः कर्मेह कृत्स्नं सदसत्तदर्थम् ।
सयुक्तिके तद्विषये प्रयत्ने सुखं ततोऽन्यत्र च दुःखमेव ॥ २९ ॥

* "समत्वमाराधनमच्युतस्ये"ति विष्णु पुराणे.

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

सुखमात्मनः स्वरूपं तद्विमुखत्वं मतेर्भवति दुःखम् ।
अनुभूयते समत्वे सुखमथ दुःखं धिया हि वैषम्ये ॥ ३० ॥
इच्छोत्थं दुःखमिष्टार्थैः किञ्चिन्मात्रं निरुध्यते ।
विना मूलं तृणं छिन्नमेकान्तेन न नश्यति ॥ ३१ ॥

दृश्यन्ते युगपत् सुखासुखकरा अर्था अभीष्टा मुहुः
सद्योऽस्तीव यतः सुखं निमिषतो जायेत दुःखं ततः ।
प्रीणातीव तदात्व एव नितरां कण्डूयनं दद्रुणं
पश्चात्तूर्णमरुन्तुदं तु तदसृक्स्यन्देन दन्दह्यते ॥ ३२ ॥

सौख्यभ्रान्त्या स्पृहयति मनो वस्तुने नाम यस्मै
भोक्ता तस्याऽप्यसुखविमना लक्ष्यतेऽन्यार्थकामः ।
तन्निर्वेष्टुर्गतिरपि पुनः सैव सर्वत्र चैवं
लोके तावत् क्व किल विषये बन्धुमर्हा सुखाशां ? ॥ ३३ ॥

श्रद्धातुं सुखदुःखयोरनुचितं रूपं तदीयं यतो
निश्चेतव्यमिदंतया हि मनसः सम्बन्धतोऽर्थैः सह ।
यातारो विकृतिं सदैव विषयाश्चित्तं प्रकृत्या चलं
तत्संयोगवियोगयोस्तु गणना लेखेव काचिज्जले ॥ ३४ ॥

कस्य प्रियं किं नु कियच्चिरं वा कृतेऽपि यत्ने ध्रियतेऽत्र लोके ? ।
अभीक्ष्णमुच्चावचदिक्प्रवृत्तं भ्राम्यत्यजस्रं ननु कालचक्रम् ॥ ३५ ॥
मा भूद्दुःखदमप्रियं तु मनसः क्वाऽपीति मोघः श्रमो
दुर्वारा कुटिला गतिर्हि जगतो नैसर्गिकीयं यतः ।
चित्तं नोद्विजते कुतोऽपि च यथा कार्यः प्रयत्नस्तथा
माऽस्त्वेवाऽऽतप इत्यशक्यघटनं तत्राऽऽतपत्रं गतिः ॥ ३६ ॥

कीटोऽपि तत्तद्विषयानुषङ्गतो
दुःखायते वा यदि वा सुखायते ।
शश्वत्सुखं चेदनुभूयते निजं
बुद्धेस्तदा स्याद्भ्रमकं तदेव तु ॥ ३७ ॥

अपूर्णम्

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

वसुन्धरा

आसीत् किल कोपि नीलकण्ठरायो नाम महीसुर उपमण्डलाधिपतिरतिसमृद्धैश्वर्यसम्पन्नो दक्षिणापथे । अनुरूपा चास्य गिरिजानाम्नी पाणिगृहीती गृहकर्मकुशलाऽऽतिथेयपरा रूपवयोनुकूला गृहिणी । अतिक्रान्ते यौवनेपि नालभताम् पुत्रमुखावलोकनसुखम् । कस्याप्यनुग्रहेण वा मन्त्रौषधिभ्यां वा येन केनापिवा कारणेन कथं वा स्यात्तनय इत्युभावपि नितान्तं चिन्ताक्रान्ताव भूताम् । यं कमपि पृच्छन्तौ यच्च किमपि केनाप्युक्तमाचरन्तौ पुत्रस्पृहया युक्तमयुक्तं वा अविमृश्य भवतु कथं वापि आवयोस्तनय इति कालमत्यवाहयताम् । अवसरेस्मिन् आसन्नषष्टिवर्षवयस्क इति नीलकण्ठरायो निवृत्तोपमण्डलाधिकारः समजनि । ततश्च तुङ्गभद्रासरित्तीरविलसितं स्ववासस्थलमुपागात्सकुटुम्बो नीलकण्ठरायः शिवपुरम् ।

तत्रच शिवपुरे पक्कणोपनिकटवर्तिनि देवीमन्दिरे कापि जरच्छबरी पुत्रावाप्तिसाधनमुपदिशति इति समुपनिशम्य गिरिजा एकस्मिन्नहनि रहो गत्वा तामपृच्छत् 'कथं स्यान्मे तनय' इति । सा तु तस्यै किमप्यनुचितमुपादिशत् । एषा गिरिजापि तदादिष्टमनुतिष्ठन्ती तत्काङ्क्षितं धनमपि दिशन्ती पुत्रावाप्तिसाधनतत्पराऽभूत् । एतल्लेशतोपि यथा नीलकण्ठरायो न जानीयात् तथा रक्षितवती गौप्यम् । प्रयातेषु केषुचिद्दिवसेषु बभूव सा गर्भवती । प्रहृष्टश्च नीलकण्ठरायो दोहदपूरणेनानन्दयद् गिरिजाम् । आसन्नवार्धिक्यापि गिरिजा गर्भवती परमानन्दतुन्दिला समये तनयमसौष्ट । पुत्रजन्ममहोत्सवमतिहृष्टो नीलकण्ठराय आत्मनः समृद्धैश्वर्यस्य समुचितमन्वतिष्ठत् । उत्पन्नश्च तनयश्चिरायुर्भवति इति बुद्ध्या सुन्दरभगवन्नामनिर्देशेन स्याद्दृष्टिदोष इति भ्रान्तराय इति तस्य नाम चक्रतुर्मातापितरौ । अरिष्टनक्षत्रजातोयं शैशवे एव जननीजनकाभ्यां वियुक्तोऽभूत् । विषमज्वरार्तो नीलकण्ठरायः गिरिजां भ्रान्तरायं शिशुमर्जितां सम्पदमप्यखिलां परित्यज्य परलोकमगात् । ततो गिरिजा तनयमभिवर्धयन्ती तदपेक्षितानि परिपूरयन्ती लालनपोषणोद्युक्ता पौगण्डावस्था

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

मनुप्राप्तमवलोक्य तदग्रिमावस्थावलोकनभाग्यविरहात् अचिकित्स्येन रोगेण पीडिता यमलोकमगात् । भ्रान्तरायोयं ततः पितृव्यगृहं प्रविष्टस्तेन रक्षणीयतामापद्यत । क्रमेण वर्धमानस्तारुण्यमवाप । उपनीतश्च माध्यमिकाङ्गलविद्यालयं प्रविष्टः कथञ्चित् षट्कृत्वः परीक्षार्थमुपविश्य प्रवेशपरीक्षामुत्तीर्णोऽभवत् । पितृव्यप्रयत्नेन तत्रैव वाष्पयानविश्राममन्दिरे (स्टेशन) लेखकत्वेन (क्लार्क) नियोजितश्च । प्रतिमासं स चत्वारिंशद्रूप्याणि वेतनत्वेनालभत । एवं गच्छति काले बहवः कन्यापितरः तं जामातरं विधातुमभिलषन्तः स्वाःस्वा रूपवयोविलासवतीर्दुहितृः प्रादर्शयन् । तत्तत्कन्यावलोकनप्रमुदितान्तरङ्गो भवेयमहं चतुर्भुजोऽविलंबेनेति सञ्चिन्तयन् मनोराज्यमनुभवति स्म । परमस्य पितृव्यः सनातनधर्माभिमानी यं कमपि नाडीकूट मंगलादिदोषादिकं विचारयन् परित्यजति स्म तास्ताः कन्यकाः । एतदवधौ भ्रान्तरायः षट्त्रिंशद्वत्सरवया जातः । अन्वर्थनामा भवितुमिव किंचिद् भ्रान्तशिरस्क इव जातः मार्गगामिनी ललना हसन् अपि किं मां वृणीध्वमिति पृच्छति स्म । एकदाऽयं कुपितो रोषारुणितनयनो प्रथितभ्रुकुटितटो विवाहकरणेऽहमिदानीं स्वतंत्रोऽस्मि मद्हृदयानन्ददायिनीं यां काम्यंगीकरोमीति कृतकलहः पितृव्येन स्वतंत्रतया स्वीयमेव मन्दिरमुपागतः कस्मादपि क्षुधाशान्तिगृहाद् भोजनार्थमन्नादिकमानयन् भुक्तभोजनो धूमयानविश्राममन्दिरे कर्म कर्तुं गच्छतिस्म । प्रत्यावृत्तश्च रात्रिभोजनं कृत्वा मित्रसमेतश्चलच्चित्रपटावलोकनादिना कृतमनोविनोदनो विवाहचिन्तयैय रात्रिमतिवाहयतिस्म । एवं गच्छति समये किंचिदस्य मित्रं निर्विद्यो निर्बुद्धिश्च गोपालरायो नाम समाश्वासयदेनमानयामि ते मनोनन्दिनीमपूर्वां विलासिनीं दयितां ललनामणिमिति । तस्मात्सकाशात् शतद्वयमितं रूप्यंधनमपि व्ययार्थे गृहीत्वा गतश्च मोहनपुरम् । तत्र संचरन् अज्ञातकैतवः कमपि कितवं कस्मिन्नपि सुखनिवासनाम्नि क्षुधोपशमगृहे समपश्यदयं गोपालरायः। अपृच्छच्च तं किमस्ति नगरेस्मिन् कापि कन्या सुन्दरी मे प्रियवयस्यस्य कृते इति। स तु मधुरमधुरैरालापैरमुं प्रीणयन् कोयं प्रियवयस्यः कुत्रत्यः, किंकिं तस्य कर्म, क उद्यमः, कियद्वार्षिकं उत्पद्यते धनं, गृहक्षेत्रादि वा, कियदपि संचितं धनं निधाविति पृष्ट्वा सर्वमपि यथावत् स्थितं वृत्तमाकर्णितवान् विदितवांश्च ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

ततः सोऽब्रवीत् अकस्मादेव भवान्मे बान्धवः संवृत्तः । अस्यत्रैव मे भगिन्याः कन्याः वसुन्धरा नाम्नी । साच वयसेदानीमष्टादशवर्षदेशीया । नास्याः पिता भ्राता वा बन्धुश्च । अहं च मातुल एव विवाहव्यवस्थापकोऽस्मि । वयोरूपलावण्यविलासगर्वितेयं यं कमपि रूपवयोविद्याविलसितमपि दर्शंदर्शं नानुरूपो मे इति निराकुर्वन्ती नानुमोदते । एतस्या माता विवाहचिन्तातान्तहृदया किंकर्तव्यमूढा वर्तते । अस्मदीयाया वसुन्धराया जनकेन सम्पादितं चत्वारिंशत्सहस्ररूप्यात्मकं धनमाहितमस्ति एतस्याः कन्याया एव स्वामिकम् । अपरं च गृहक्षेत्रारामादिकमपि विद्यते प्रतिवत्सरं रूप्यसहस्रानूनमुत्पादनक्षमम् । इदानीमेव ते दर्शयामि तां वसुन्धराम् इत्यालपन् समं गोपालरायेण स धनंजयरायो गृहमगच्छत् । सुविशाले सुन्दरवरे सुव्यवस्थिते मन्दिरे प्रवेश्य वसुन्धरां ललनामणिमदर्शयत् । मात्रा सह स्वागतपानाशनादिना तं बहूपाचरच्च । परमादृतोयं गोपालरायो वसुन्धरावयोरूपप्रमुदितहृदयः किं किमग्रे करणीयमित्यपृच्छत् । कन्यायास्तन्मातुश्च समक्षं धनंजयरायोऽभाषत इतश्चतुर्थे दिवसे भगिन्या तरलिकया कन्यया वसुन्धरया सार्धमहं घण्टाद्वयवादनावसरे भ्रान्तरायगृहंप्रति समागमिष्यामि तं दर्शयितुम् । धनसम्पन्नो युवा । प्रतिमासमर्जयति स्वतश्च धनं रूपवानितिच श्रणुमहे । अतो यदि महाभागोऽयं तम् अनुमोदेत तर्हि सम्यगेव भविष्यति । एतत्स्वामिकमपि भूमि-धनं तदायत्तमेव भविष्यति । अस्तु नामेदम् । भवान् अग्रतो गच्छतु । अर्थादितश्चतुर्थो दिवसो रविवासरः । तस्य विश्रान्तिर्लभ्येतैव कुत्र वा नगरविभागे तस्य मन्दिरम् । कियती संख्या मन्दिरस्येति वदन् स्मरणार्थमलिखच्च कस्मिंश्चिल्लघुनि पुस्तके ।

ततश्च ताम्बूलदानादिना सत्कृतो विसर्जितश्च गोपालरायो धन्यं कृतकृत्यमेवात्मानं मन्यमानो बाष्पयानेनैव प्रत्यावृत्तश्च प्रातरेव मित्राय सर्वमाचचक्षे । सोपि अमन्दानन्दतुन्दिलो गाढमालिंग्य गोपालं धन्यो भवान् यद्गतमात्र एव कृतकार्यः संजात इति समभ्यनन्दत् ।

ततश्च रविवासरे सज्जीकृत्य गृहं दारुमयान्यासनानि यथास्थानं सुव्यवस्थया प्रास्थापयत् । स्वयंकृतमुखक्षौरः सुस्निग्धनीलकुन्तलः तत्क्षणे एव

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

रजकानीतशुभवसनालंकृतो गोपालरायेण साकं धनंजयरायादीनां मार्गमेव प्रतीक्षमाणस्तस्थौ । घटीयन्त्रमिदं जडादपि जडं कुतस्त्वरन् कण्टकेन द्वितीयां संख्यां न स्पृशतीत्यसकृदशपच्च तत् । गृहांगणमुपागतो निटिलनिहितकरतलो दूरतो दत्तदृष्टिरनवलोकयन् तान् निश्वसन्नन्तरागच्छति स्म । किमरे गोपाल एवासि त्वम् । घण्टाद्वयवादनवेला जाता, कुत्र ते वसुन्धरा इति वदत्येव भ्रान्तराये फाँ फाँ फाँ इति कर्णकर्कशं ध्वनिविशेषमुच्चरन् अकस्मादेव स्निग्धमसृणशोभमानवर्णविशेषो मरुत्तरो (मोटार) भ्रान्तरायस्य गृहांगणमुपागतस्तस्थौ । तस्माच्च प्रथमतः कन्यामातुलो धनंजयरायस्ततो कन्याजननी तरलिकानाम्नी वृद्धा, तदनुच विलासोपहसितवरोप्सरोरूपा वसुन्धरा च मरुत्तरतोऽवतीर्य भ्रान्तरायस्य मन्दिरंप्राविशन् तथा यथोचितमासनेषूपाविशंश्च । ततश्च गोपालरायो धनंजयरायाय स्वागतमावेद्य इयमेव कन्या वसुन्धरेत्यवोचत् । भ्रान्तरायोयमुद्वोढुकाम इति धनंजयतरलिकावसुन्धराभ्यो न्यरूपयच्च । यद्यदाप्रष्टव्यं तदापृच्छ्य धनंजयो वसुन्धरां किमपि प्रष्टुकामश्चेत् अवश्यं पृच्छतु तावदिति वदन् भ्रान्तरायमुखमवालोकयत् । भ्रान्तरायोपि प्रहृष्टान्तःकरणो गोपालरायो मे सर्वमाचचक्षे, अतो नान्यत् किमपि प्रष्टव्यम्; किंतु देवी वसुन्धरा किमभिप्रैतीति तावद्विदित्वा यथा वसरमेव विवाहमंगलविधिर नुष्ठितः स्यातथा विधेयमित्यवोचद् मृदुहासदर्शितदशनाग्रो भ्रान्तरायः ।

ततो वसुन्धरामुखमवलोकयन् धनंजयरायः शनैर्गोपालरायकर्णाभ्यर्णमुपेतो रहस्यमिव किमप्यत्रवीत् । सोपि तदुपश्रुत्य भ्रान्तरायस्य कर्णे प्राह । सच तत्क्षणादेवोत्थायांतर्गृहमगात् । ततो नेत्रसंकेतेन वसुन्धराप्युत्थायांतर्गृहंप्राविशत् । धनंजयरायो द्वारयुगलं स्वयं करतलेन पिहितवान् । ततः पर्यङ्कोपविष्टो भ्रान्तरायः कम्पमानगात्रयष्टिः स्विन्नेन करयुगलेनाशिथिलमालिलिंगताम् । 'मा मा' इति निषेधाक्षराभिरामाया अंसविर्वांतेतन्दुमुख्या वसुंधराया विंबाधररसमास्वादयत् उपावेशयत् पार्श्वे । अधोनिहितदृष्टिरपि चपलधवलापांगेन समन्दहासमवलोक्य तं प्रियवल्लभं 'यथाविधि पाणिग्रहणमन्तरा न मह्यं रोचते इदमेकासनोपवेशनमशिथिलमालिंगनमधरास्वादनं च । परमहमेतावदेव

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

निरूपयामि यत् शतशो निरीक्षिता मया वराः, किंतु न भवानिव युवा रूपवयो-धनादिसम्पन्नो मयाऽवलोकित इति। कदा वा स्यात्स विवाहयोग सस्मितं इति वदन्ती सरभसमतिचपला तद्वस्ततो विमोचिता द्वारमुद्घाट्य बहिरागमत्। धनञ्जयरायो निश्चितमर्थं दिनद्वयादेव निवेदयाम इत्यावेद्य मधुरमधुरमालपन् खाद्योपहारमुपभुं-जन् सलज्जाया वसुन्धरायास्तरलिकायाश्च पृथग् भाण्डेषु चीनधवलमृण्मयेषु प्रदाय प्रपीतचायपेयोऽप उपस्पृश्य गृहीततांबूलो भुक्तपीतखाद्यपेयाभ्याम् गृहीतताम्बू-लाभ्यां वसुन्धरातरलिकाभ्यां सहैवोत्थाय मरुत्तरयानमारुह्य निरगात्। भ्रान्त-गोपालरायौ बहिरंगणमभ्येत्य कृतनमस्कारौ यावन्मरुत्तरदर्शनं स्थित्वा अन्तर्हिते च तस्मिन् गृहान्तरागच्छताम्। प्रहर्षातिरेकपुलकितकलेवरो भ्रान्तरायो धन्यम्मन्यो गोपालरायमतितरामभ्यनन्दत्। तस्या वयोरूपविलास-विद्याविनयादीन्नितरामवर्णयच्च। ततश्च गते दिनद्वये मोहनपुरीयपत्रागमनमेव निरीक्षमाणः स्कन्धनिहितचर्मपेटिकादर्शनेन नापितानपि किमस्ति मन्नाम्ना पत्रं मोहनपुरीयमित्यसकृदापृच्छमानो हसद्भिरुपहसितो 'न भवान् पत्रप्रापक' ? इति भाषमाणश्चिन्तानुतप्तहृदयो यावदन्तरुपाविशत्, तावत् कश्चिदागत्य पत्रमेकं निक्षिप्य गृहान्तरमगात्।

प्रचलांगुलिना करेण पत्रमादाय यावद्दुद्घाटय समनुवाचयति, तावद् व्यगलन् नयनाभ्यामानन्दबाष्पबिन्दवः। उदभवन् रोमाञ्चजालानि। पत्रमिदं निधाय शिरसि हहहेति हसन्नुच्चैरतितरामनृत्यत्। चक्रभ्रमिरनेककृत्वः परिबभ्राम। अधरनिहिताङ्गुलिदल उच्चैः किमप्यनक्षरं ध्वनिमुदैरयत्। तस्मिन्नेव समये समायातं गोपालरायमाशिथिलमाश्लिष्य पत्रमदर्शयत्। ततश्चोभौ समालोच्य विवाहमङ्गलार्थं किं किमनुष्ठेयं कैःकैः गन्तव्यमित्यादि निरधारयताम्।

मार्गशीर्षशुक्लपक्षपञ्चम्यां विवाहमङ्गलमुहूर्तो निर्धारितो मोहनपुरे एव परिणयो भावीति च। तमनुसृत्य भ्रान्तरायो गोपालरायेन परिमितेन स्त्रीजनेन सहितो विवाहार्थमागान्मोहनपुरम्। तदर्थं सहस्ररूप्याण्यानयच्च। सर्वं वस्तुजातमत्र सिद्धं, केवलं रूप्याण्यानेयानीति धनञ्जयः प्रथममेव पत्र

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

मुखेनासूचयच्च । धनञ्जयरायो बाष्पयानविश्राममन्दिर एवाभ्येत्य स्वागतेन वरपक्षीयानभिनन्द्य स्वावासगृहसमीपे एवापरस्मिन्मन्दिरे न्यवासयत् । वस्त्रपात्रधान्यपानीयादि सर्वं सुव्यवस्थया समकल्पयच्च । तत्र चतुर्षु दिवसेषु बहुविजृम्भणं विवाहमङ्गलविधिरनुष्ठितः । ततश्च गोपालरायमुखेन वसुन्धरया सहैव गमनमसूचयत् भ्रान्तरायः । धनञ्जयरायस्तरलिकया सहैत्य बाढं प्रेषयामहे वसुन्धराम् नात्र चिन्तालेशोपि विधेयः । यतः सा अष्टादशवर्षदेशीया वर्तते । सर्वथा ऋतुस्नाता च । अतः अवश्यं गर्भाधानविधिरपि प्रवर्त्यतामित्युदीर्य तरलिकया समेतो भ्रान्तरायनगरमागत्य दिनचतुष्टयं स्थित्वा समये समये क्षेमसमाचारनिरूपणार्थमादिश्य वसुन्धराभ्रान्तराया भ्यामनुमोदितो धनंजयस्तरलिकया समं मोहनपुरमागात् । वसुन्धरापि मधुरमधुरैरालापैः सम्रूभङ्गं कटाक्षप्रक्षेपैर्मन्दहासैरशिथिलालिङ्गनैः सौरतविशेषैश्च तं भ्रान्तरायं परवशीचकार । अहोरात्रं तया सहैव निवसन्नयम् धूमशकटविश्राममन्दिरे स्वकर्मकरणाय समयमुल्लङ्घयन् तदधिकारिणाम् रोषपात्रमभूत् । श्रीमान् पितृव्योपि वधूसमेतं सुखासक्तमवलोक्य भ्रांतरायं तदीयं स्थावरजंगमात्मकं सर्वं रिक्थं तदधीनमकरोत् । एवं अमन्दानन्दतुन्दिलो भ्रांतरायो मासत्रयमत्यवाहयत् । एतदवधौ बाष्पयानाधिकारिणो भ्रांतरायं न यथासमयमागच्छतीति, न व्यवस्थया अवहितः कर्म करोतीति तत्कार्यालयात् बहिरकुर्वन् । वसुंधरापि का ते चिंता, कुतो वा तत्कर्म परायत्तं अहमस्मि मदीयमगारं धनं गृहं क्षेत्रादिकं चेत्येवमावेदयन्ती तममोहयत् ।

अस्मदीयमोहनपुरसविधे भूकेदाराणामुत्पत्तिरसाधारणी, अत्र न सर्वथा तथा । अतः अत्रत्यमखिलं विक्रीय तथा निधिगतं विंशत्सहस्रात्मकमपि धनं गृहीत्वा अस्मन्मातुलस्य धनंजयरायस्यानुमत्या मोहनपुरे एव अधिकोत्पत्तिसाधनं संग्राह्यमित्याद्युपदिश्य भ्रांतरायेण सर्वं धनोत्पत्तिसाधनं विक्राप्य सर्वमपि धनं जंगममेव सम्पाद्य स्वहस्तसात्कृत्वा एकस्मिन्नहनि दियद्द्वयावधौ प्रत्यागमिष्यामीत्यावेद्य एकाकिनी मोहनपुरमगात् । भ्रान्तरायोऽयमन्वर्थनामा सर्वं यथार्थमवगच्छन् पत्नी मे वसुंधरा मातुलाय कथयित्वा उत्पत्तिसाधनमभिवर्धयितुं

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

प्रत्यागमिष्यति । मामंतरा न सर्वथा तिष्ठति मोहनपुरे प्रेममूर्तिरियम् इति मन्वानो मनोराज्यसुखमनुभवन् दिनद्वयं कथमप्यत्यवाहयत् । ततोप्यनागतायां तस्यां चिंतातप्यमानहृदयः अद्य श्व इति मार्गं निरीक्षमाणस्तया विरहितः पंचदश-दिनान्यप्यत्यवाहयत् । ततश्च रुदन् गलन्नयनजलो गोपालरायमप्राक्षीत् किमे-वमभूदिति । सर्वमपि भ्रांतरायनिरूपितं वृत्तमुपनिशम्य स भीतश्चकितश्च अभूत् किमरे मूर्ख! सर्वस्वं यददाद् भवान् व्यक्रीणाच्च क्षेत्रगृहादिकं एतन्न मे अब्रवीत् किंचिदपि भवान्। एतेन सर्वस्वग्रहणेन तस्याः कुत्रापि पलायनमिवाहं तर्कये नान्य-दिति तेन निरूपितोपि न मेने तत्सत्यम्, तादृशी प्रेममूर्तिर्नैव कदापि तथा करि-ष्यति। प्रायो मोहनपुरे सा स्याज्ज्वरितेति मन्यमानः स्वयमेकाकी मोहनपुरमगात्। रात्रावष्टवादनावसरे तदीयं गृहं पूर्वं विवाहावसरे दृष्टं प्रविष्टश्च सुसज्जिते तद्गृहे कस्मिंश्चिद्दारुमये आसने उपविष्टश्च तत्रैव स्वीयं शयनमंजूषादिकं प्रावासिकमुपास्थापयत् । अतीतेषु दशसु क्षणेषु कंचिदपि अनवेक्षमाणो रोषारुणनयनः अये वसुन्धरे! वसुंधरे! इत्युच्चैराक्रोशत् । ततश्च द्वित्रा नवयुवतयो ललना अन्तरेव स्थिता अपरिचितमेवमाक्रोशन्तमवलोक्य चकिता भीताअपि स्मेरवदना जनन्यै प्राहुरागतो बहिः कोपि युवेति । ततो वृद्धा कापि बहिरुपेत्य 'को भवान्, कुत्रत्यः, कुतोऽत्रागतः अपरिचितोऽ त्राभ्येत्य पुरुषरहिते गृहे ललनाः भीषयति' इति रुषा प्रस्फुरदधरा समपृच्छत् । ततोऽयमपि चकितः किमत्र नास्ति वसुंधरा तरलि-का च? । तदावासगृमिदं जानाम्यहम् । अभून्मासत्रयादर्वागत्रैव मे विवाहो वसुंधरयेति उत्तरमदात्। ततश्च सा वृद्धा उच्चैर्हसंती प्राह 'किमरे मूर्खोऽसि त्वम्। सा किल वसुन्धरा वेश्या तरलिकापि । गृहमिदमस्मदीयम् । वयं वर्षचतुष्ट-यात्प्रागेव कार्यवशादन्यत्रोत्तरदेशे आस्म । तदवधौ सा तरलिका भाटकेनास्म-द्गृहे एवासीत् वेश्या पुरुषमोहनदक्षा च इत्यागमनानंतरमशृणुम । आगमन-मस्माकं विदित्वा सा कुत्रापि गता तन्न जानीमो वयम् । 'वेश्यया धूर्तया नवनव-पुरुषान्वेषणपरायणया कथं विवाहितो भवान्' इति भाषमाणा मुहुर्मुहुरुच्चैर्ह-सन्ती बहिर्गत्वाऽनेकान् सद्गृहस्थानानीय पुरः सन्न्यधापयत् । तेपि

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

हसन्तस्तं सर्वं वृतान्तमपृच्छन् । सोऽप्यावेदयदखिलमुदंतम् । एवं तरलिकया वसुंधरया धूर्तशिरोमणिना धनंजयरायेनापि शतशो वंचिता विवाह विधिनेति केचन सोदाहरणमब्रुवन् । किंकर्तव्यमधुनेति पृष्टेषु केचनाहुः मार्गशीर्षे तव विवाहः, सम्प्रति मासत्रयमतिक्रान्तम् । अद्यैव खलु फाल्गुणी पौर्णिमा । तन्नाम्ना शङ्खवाद्यं वादयन् अटतु भवानरण्यादरण्यमिति ।

एवमुक्तो भ्रान्तरायः अचिन्तयन्मनसा । स्वग्रामे विद्यमानं गृहक्षेत्रादिकं विक्रीतमात्मसात्कृतम्, निधिगतम् उत यच्चान्यत्सर्वं वसु वसुन्धरयाप्यपहृतम् तदधीनेन धूमशकटीयङ्कर्माप्यपहारितम् । एवं सर्वस्वमपहार्य अन्वर्थनामा भ्रान्तरायोहं किं करोमि गृहं गत्वेत्युदीर्य अयःपत्रिकामयीं पेटिकां तत्रत्यमल्पमूल्यं वस्तुजातमपि तत्र विक्रीय तद्धनेन भोजनं व्यधादन्नविक्रयशालासु । ततश्च गृहीतशयनग्रन्थिः रात्रौ वाष्पयानमधिरुह्य काप्यगाद् अनिर्दिष्टं स्थलम् ।

पितृव्यो नीलकण्ठरायश्चिराद्वृत्तमुपनिशम्य दुःखितस्तमशोधयत् कुत्र वर्तते इति । परं तस्य शोधं नालभत । किंतु स भ्रान्तरायः कस्मिञ्चिन्नगरे जीर्णकुड्यायां धर्मशालायां अशनवसनरहितो निवसन् भ्रान्ताशिरस्को 'वसुन्धरा' वसुन्धरेति जल्पन् कदाचित्कदाचित् क्षुधार्तो भुक्तोत्सृष्टोच्छिष्टभोजनः कालमतिवाहयन् कालवशोऽभूत् ।

आर्याः प्रियपाठकाः ! कथाया अस्यास्तात्पर्यमनुशास्यं जानीयुरेव सूक्ष्मधियो भवन्तः ।

पुण्यपत्तननिवासिनां सरससाहित्यविदुषां प्रियसुहृदाम् एस. टी. पप्पु महाभागानां जयकर्णाटके प्रकाशितं 'हुच्चण्ण' इत्याख्यं वस्तु मूलभूतमस्मत्कथाया इति सानन्दमावेदयामः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

रसतत्त्वम्

लेखकः—वाचस्पतिः गुंडेराव हरकारे डि. जज गद्वाल ।

(अयं लेखः हैदराबादनगरे अखिल भारतीय प्राच्यविद्यापरिषदि समर्पितः विमर्शितश्च ।)

अयं प्रत्यहं सर्वानुभवगोचरो विषयः, यत् कश्चन पुरुषः किंचित् वस्तु नेत्राभ्यां पश्यन् दृष्टचरं वा मनसा स्मरन् तदाकृष्टान्तः मुहूर्तं तन्मयीभवति। यदेतत् स्वसत्तासंवेदनामपहाय तन्मयीभवनं तदेवालौकिको रसास्वादः, भावान्तरविस्मरणं, तदेकतानतापादनं च । ईदृश्या मनोवृत्तेः मूलं कारणं तदेव, इन्द्रियसन्निकर्षाश्रयं प्रत्यक्षीक्रियमाणं स्मरणविषयीभूतं वा वस्तु । तदवलम्ब्यैव तादृशी मनोवृत्तिः जायते । वृत्यन्तरपरिणतेरनन्तरं कानिचित् चिन्हानि तादृङ्-मनोवृत्तिद्योतनानि नियमेन समुत्पद्यन्ते । तत्रात्युत्कटामवस्थां द्योतयितुमन्ये केचन तत्परिस्थित्यनुकूला विषया झटिति तादृशचिन्होत्पादने साहाय्यमप्याचरन्ति । तदा तन्मयावस्था संपूर्णा संपद्यते । ईदृशी मनोवृत्तिः यावत्कालं स्थेमानं प्राप्य वरीवर्ति तावत्कालं तदनुकूलान् तत्प्रतिकूलांश्च सर्वानपि विषयान् तदाकारतयैव पश्यति । विलक्षणमननुभूतपूर्वं विगलितवेद्यान्तरं चानन्दविशेषमनुभवति । स एव रसास्वाद इति व्यपदिश्यते ।

"विभावानुभावव्यभिचारिसंयोगात् : रसनिष्पत्ति"रिति नाट्यशास्त्रप्रवर्तकस्य भरतमुनेः सूत्रम् । इदमेव हि रसस्य लक्षणविधायकं सूत्रम् । यथा व्यवहारे कस्यचित् चित्तवृत्तिविशेषस्य कान्तादिविषयकप्रीत्यादेः यानालम्ब्य मूर्तिमानाविर्भावः प्रतीतिविषयीभवति, ते एव तादृशचित्तवृत्तिविशेषापरपर्यायरत्यादेः उत्पादकानि कारणानि । तादृशेभ्यः कारणेभ्यः समुत्पन्नो रत्यादिरूपश्चित्तवृत्तिविशेषः स्वस्य परिपोषातिशयाय कानिचिदुद्दीपकानि अन्यानि वस्तून्यभिलषति । अपि च समुत्पन्ना रत्यादिस्वरूपाश्चित्तवृत्तिविशेषाः चेष्टारूपाणि कानिचित् कार्याण्यपि जनयन्ति एतादृशी च कार्याणि नानाविधानि । कानिचित् कायिकानि संकेतविशेषकाक्वादीनि, कानिचिन्मानसिकानि

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

स्वात्ममात्रगोचराणि । एते चित्तवृत्तिविशेषाश्च रत्यादयः केषांचिद्भाव-विशेषाणां साहाय्येन कायिकचेष्टादिरूपाणि कार्याणि झटित्युत्पादयितुं प्रभवन्ति। अत एव रत्यादयः स्वकारणैः स्वकार्यैः स्वसहायकैश्च सम्यगभिव्यज्यमाना प्रतीतिविषयीभवंति । चित्तवृत्तिविशेष एव स्थायीभावः अतिसूक्ष्मरूपेण वासनात्मना तिष्ठति । तमेव कारणानि आस्वादयोग्यतां नयंति विभावरूपेण । तमेव कार्याणि अनुभवविषयीकुर्वन्ति अनुभावात्मना । तमेव विशेषतः आभिमुख्येन नाम चेष्टादिकार्यजनने आनुकूल्येन चरान्ति साहाय्यकाः भावविशेषाः व्यभिचारित्वव्यपदेशेन । तस्मात् यथा प्रत्यहं व्यवहारे कारणकार्य—सहायकैः कस्यचिद् मनोवृत्तिविशेषः स्फुटतया प्रत्येति। तथैव शास्त्रे विभावानुभावव्यभि-चारिभिः स्थायीभावः अभिव्यक्तः रसतामापद्यते ।

अत्र सूत्रस्य "संयोग" पदं बहवो बहुधा व्याचक्षाणामिथो विप्रवदन्ते । एतस्मादेव कारणात् साहित्यशास्त्रे अनेके विभिन्नाः सम्प्रदायाः प्रवर्तन्ते । तत्र मीमांसाशास्त्ररीत्या विचारसरणिमनुसरन् भट्टलोल्लटः मुख्य-सम्बन्धेन अनुकार्ये रामादावेव रसोत्पत्तिं मन्वानस्तद्वेषविशेषधारिणि नटे एव, असत्यपि रसे रामत्वारोपात् रसः विभावैरुत्पादितः अनुभावैः प्रतीतिपदवीं-मानीतः व्यभिचारिभावैः पुष्टीकृतः इति व्यवस्थापयति । अस्मिन् उत्पाद्यो-त्पादकरूपसम्बन्धे सामाजिकेषु रसानुदयात् तार्किकमतरीत्या श्रीशङ्कुकः अनुमितिविषयीभूतः स्थायीभाव एव रस इति प्रतिपादयति । यथा कस्मिंश्चित् स्थलविशेषे असतोऽपि धूमस्य अभिमानात् धूमनियतस्य वन्हेरनुमानम् , तथा सम्यक् शिक्षितेन नटेन सुनिपुणं "ममैवेते विभावादयः" इति प्रकाशितै-स्तत्रासद्भिरपि विभावाद्यैः रतिरनुमीयमानाऽपि निजसौन्दर्यबलात् सामाजिका-नामास्वाद्यमानतया चमत्कारमादधती रसतामेतीति रतेरनुमितेरेव रसनिष्प-त्तिरिति । अत्र प्रत्यक्षमेव ज्ञानं चमत्कारमावहति, अनुमितौ न कोऽपि चमत्कार इति लोकप्रसिद्धानुभव एव अस्मिन्मते अरुचिमावहति । तस्माद् भट्टनायकः सांख्यशास्त्रसम्प्रदायमनुसृत्यैतत्सूत्रमन्यथैव व्याख्याति । तन्मतें शब्दस्याभिधायकत्वव्यापारवद् भावकत्वं भोजकत्वमिति अभिधाविलक्षणौ

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

द्वावन्यौ व्यापारौ। अभिधाव्यापारेण काव्यार्थबोधो जायते। काव्यस्य भावकत्वं नाम वाच्यार्थबोधादन्तरं तत्तद्विभावादीनां तत्तदालम्बनविशेषसम्बन्धांशानपहाय साधारणत्वापादनम्। अयं द्वितीयो व्यापारः रसविषयः। एवं भाविते च रसे तस्य भोगः। अयमेव प्रधानो भोजकत्वाख्यो व्यापारः। स्मृत्यनुभवोभयप्रतिपत्तिविलक्षणः द्रुतिविस्तारविकासरूपः निरस्तसमस्तरजस्तमोमलः विशुद्धसत्वमयनिजचित्स्वभावनिवृत्तिद्रुतिविश्रान्तिलक्षणः अलौकिकः आनन्दः।

अस्मिन्नपि व्याख्याने शब्दस्य अभिधाव्यापारात् भावकत्वभोजकत्वरूपव्यापारद्वयकल्पने प्रमाणाभावः। अपि च सत्त्वगुणस्योद्रेकेण रजस्तमसी न्यक्कृत्य आविर्भवन् यः प्रकाशः स एवानन्दः, तस्य विश्रान्तिः ज्ञेयान्तरसम्पर्कराहित्येनावस्थितिरिति सांख्यसिद्धान्तानुसारी पन्थाः। तमन्ये नाङ्गीकुर्वन्ति। तस्मादीदृशं पोष्यपोषकभावरूपं सम्बन्धं परित्यज्य केवलं साहित्यशास्त्रमनुसृत्य व्यङ्ग्यव्यञ्जकभावरूपसम्बन्ध एव सूत्रस्थसंयोगपदस्य परमोऽर्थ इति प्रतिपादयन्ति सिद्धान्तभूतेन तुरीयव्याख्यानेन श्रीमदाचार्याभिनवगुप्तपादाः। एतेषामाशयस्तु सरसकाव्यसंगृहीतैर्निपुणनटप्रदर्शितैः वा सामाजिकभाव्यमानैः नायिकानायकादिभिरालम्बनविभावैः चन्द्रिकोद्यानमन्दमारुतादिभिरुद्दीपनविभावैः कटाक्षभुजाक्षेपादिभिरनुभावैर्निर्वेदचिन्तादिभिर्व्यभिचारिभावैश्च समुल्लसितः अङ्कुरितत्व-कन्दलितत्व-पल्लवितत्वाद्यवस्थाक्रमेण अभिव्यक्तः अतिरस्कृतप्रभावः स्थिरतां प्राप्तः वासनात्मकः चित्तवृत्तिविशेषः रत्यादिरेव सहृदयैश्चर्व्यमाणः पानकरस इव विगलितवेद्यान्तरतया परमानन्दरूपतापापणेन स्वाद्यतां नीयमानो "रस" एव रसपदार्थः इति।

परमार्थस्तु—परित्यक्तविशेषैः साधारण्येन प्रतीतैर्विभावादिभिरभिव्यक्तं साधारण्येन गृहीतं सामाजिकादिरत्याद्यवच्छिन्नमात्मचैतन्यं चैतन्यविशिष्टं तादृशरत्यादिकं वा कार्यज्ञाप्यविलक्षणं आनन्दांशे भग्नावरणतया आनन्दरूपतया प्रकाशमानं विभावादिसम्भिन्नं रस इति।

ईदृशे च सूत्रव्याख्याने विशेषतो सूत्रस्य "संयोग" पदस्य व्यङ्ग्यव्यञ्जकभावसम्बन्धरूपार्थत्वसमर्थनेन साहित्यशास्त्रस्य शास्त्रान्तरविलक्षणोऽ

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

K Srinivasa Iyengar
Mysore.

नन्यादृशः सम्प्रदायः ऐदम्प्राथम्येन श्रीमद्भिरभिनवगुप्तपादाचार्यैरेव स्वोपज्ञतया सप्रमाणं प्रतिपादित इति निश्चप्रचम्। अयमेव साहित्यशास्त्रस्य सिद्धान्त इत्यपि वक्तुं सुशकम्। अभिनवगुप्तानां चरमे वयसि प्रतिष्ठापदवीमारुरुक्षुमेकं महिमभट्टं विना प्रायशः सर्वेऽपि सुप्रसिद्धाः साहित्यकाराः अमुमेव मार्गं सिद्धान्तत्वेन समवलम्ब्य प्रावर्तन्त इति साहित्यशास्त्रस्येतिहासं परिशीलयतां विदित एव विषयः। महिमभट्टस्तु न केवलं व्यञ्जनां किंतु ध्वनिमेवोन्मुम्लिषुः पदार्थान्तरत्वेनानङ्गीकुर्वाणस्तमनुमानेऽन्तर्भावयितुं महान्तं प्रयत्नं समास्थत्। आस्तां तावत्तस्य विषयः। आचार्यमम्मटः काव्यप्रकाशे, हेमचन्द्रः काव्यानुशासने, विश्वनाथः साहित्यदर्पणे; शारदातनयो भावप्रकाशे, पण्डितराजो रसगङ्गाधरे अन्ये च विद्वदग्रेसराः स्वकीयग्रन्थेषु महता प्रपञ्चेन साधकबाधकप्रमाणविमर्शनपूर्वकमिदमेव तत्त्वं सिद्धान्तयामासुः। किंच गान्धर्वशास्त्रप्रवर्तकाः सङ्गीतरत्नाकरकारादयोऽमीमामेव सरणिमन्वसरन्।

अत्रेदं विचार्यते— किमिदं श्रीमदभिनवगुप्तपादानां मतं केवलं साहित्यशास्त्रतत्त्वमनुसृत्यैव प्रवर्तितं येनेदमेव सिद्धान्तत्वेन अवश्यतयाङ्गीकरणीयम्, आहोस्वित् अस्मिन्नपि मते कस्यचित् शास्त्रान्तरस्याल्पीयसाऽपि प्रमाणेन सम्बन्धोऽस्ति येनात्रापि श्रीशङ्कुकादिमतेष्विवारुचिरुद्भवेत्, सूत्रस्यार्थान्तरयुयुक्षा चावश्यकत्वेन समुपतिष्ठेत्। इदं तावन्निर्विवादम्—अस्मिन्नपि मते तत्तद्विभावादीनां यत् साधारणत्वापादनं तत् भट्टनायकमते अभिधातो भावनाख्यद्वितीयव्यापाराद् न भिद्यते। सीतादिशब्दानां परित्यक्तजनकतनयात्वादिविशेषाणां स्त्रीमात्रवाचिनामेव विभावोपस्थापकत्वमङ्गीक्रियते रामादिकमाश्रयं परिकल्प्य स्वप्रतिभाप्रभावलब्धाः सर्वलोकसाधारण्य एव तास्ता अवस्थाः प्रदर्श्यन्ते। भट्टनायकमतेऽपि साधारणीकरणात्मा भावनेयं न दोषाय। भरतेनैव "ता एव परिहृतविशेषा रसहेतवः" इति स्पष्टतया सूत्रितत्वात्। किंतु भट्टनायकमते शब्दस्य अभिधामन्तरेण भावना भोजनेति व्यापारद्वयकल्पनं गौरवग्रस्तमिति लाघवादेवादेकयैव व्यञ्जनाख्यया वृत्त्या इष्टार्थसिद्धिरिति व्यङ्ग्यव्यञ्जकभावकल्पनम्।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

K. Srinivasa Iyenga
Mysore

इदं तु बोध्यम् विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिरित्यनेन रसपरिपोषार्थं रामादिष्वपि तत्तद्विशेषमपहाय धीरोदात्तादिसामान्यावभासः आवश्यकः। किंच यावदयं "राम" "इयं सीता" इति बुद्धिः तावन्न चमत्कारः, औचित्याभावात्। यदा सामान्यतो भानं तदैव रसास्वादः। एवं परिहृतविशेषा नायिकानायकादयः यावत् स्थायिव्यक्तिरूपचर्वणाविषयतां गताः तावदेव रसास्वादः।

रसस्तु भग्नावरणा चिदेव। तस्मात्सामाजिक सहृदयहृदयस्यान्तः करणावच्छिन्नं चैतन्यमेव प्रमातृ। तस्यैव रत्यादिस्थाय्यवच्छिन्नस्य रसत्वात्। चैतन्यत्वांशमादाय अभिन्नत्वव्यपदेशः। नायकादिगततद्विशिष्टतद्व्यक्तित्व-भानादेव चर्वणानिवृत्तिः। चर्वणाया निवृत्तौ रसः शान्तः इति प्रतीतिः। इयं च चर्वणा आनन्दाभिव्यक्तिरेव। विभावादिविषयसंवलितचिदानन्दाव लम्बनत्वादेव सकलप्रत्यक्षादिप्रगितिविलक्षणा, परब्रह्मास्वादात् समाधेश्च विलक्षणा भाव्या च काव्यव्यापारमात्रादेवेति ध्येयम्।

अत्रेदमनुसन्धेयम्—सूत्रस्थ "संयोग" पदस्य व्यङ्ग्यव्यञ्जकभाव-परतया व्याख्यानमात्रेण अयं सर्वोऽपि विचारप्रपञ्चः सूत्रकृतामभिप्रेत इति न शक्यते निश्चयेन वक्तुम्। एते चाभिनवगुप्ताः येशूखिस्तस्य दशमशतकस्य तृतीये भागे समभूवन् काश्मीरदेशे। तदानींतने काले तस्मिंश्च देशे सामाजिक्यः धार्मिक्यश्च याः परिस्थितय आसन्, तदनुरोधेनैवास्य महापुरु-षस्याचारो विचारश्च पर्यणंसिष्टामिति ऊह्यते। तदानीं काश्मीरदेशे शैवसं-प्रदायः महता प्रमाणेनोदजृम्भत। तत्राऽपि काश्मीरीयशैवसंप्रदायस्य किंचिद्वै-शिष्ट्यमित्यागमविदां नागोचरो विषयः। किं च तदानींतने काले शैवागमे द्वैतोपासनापद्धतेः चरमावस्था, अद्वैतोपासनायाश्च प्रारम्भ आसीत्। एते चाचार्याः गीर्वाणसाहित्ये परं प्रावीण्यमुपगताः, तंत्रशास्त्रे निष्णाताः, उत्पला चार्योपज्ञप्रत्यभिज्ञादर्शनस्य प्रवर्तकाश्चासन्। एषामायुषि तिस्रः विभिन्ना विचारक्रांतयो दृश्यन्ते। तांत्रिकः कालः प्रथमः, आलंकारिको द्वितीयः, निगमचरमस्तु चरमश्चेति तदीयतंत्रालोकग्रंथे एवोत्तरभागे, तेषां मनोवृत्तिः तांत्रिकरहस्येभ्यः परावृत्य स्वभावसुंदरे ललितमनोहरे काव्यमार्गे प्रावर्तिष्टेति तदीयनिसर्गरमणीयोपवर्तनगिरिनद्युपवर्णनेनाप्रतिहतक्रमस्य जगन्नायकस्य पुष्पसायकस्य महिमातिशयप्रदर्शनेन च सुस्पष्टं प्रतीयते। अनंतरमभिनव-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

भारतीग्रंथे तु वेदान्तशास्त्रप्रवृत्तिर्दृश्यते एतेन । तेषामायुषो मध्यमः काल एव प्राधान्येन साहित्यग्रंथरचनाकालः । तदा ते साहित्यमेव शास्त्रमभिमन्यमानाः तांत्रिकोपासनावासनावासितांतःकरणाः वेदांततत्वविचारोन्मुखाश्चासन् । तस्माद् एतेषां सूत्रव्याख्यानमनुसृत्य यो विशेषोऽर्थः सप्रपंचं निरूपितः, स सर्वोऽपि साहित्यशास्त्रसिद्धान्तमात्रलभ्य इति वक्तुं न शक्यते ।

किं चानतरमेव भानुदत्तेन स्पष्टतयैव स्वकीयरसतरंगिण्यां रसस्वरूप-निरूपणमभिनवामेव सरणिमवलंब्य कृतम् । यथा—विभावानुभावव्यभि-चारिभावैः परिपूर्णः स्थायिभावो रस्यमानो रसः । विभावादिभिः मनोविश्रामो यत्र क्रियते स वा रसः । प्रबुद्धस्थायिभाववासना वा रसः । प्रबोधकाः विभावादयः । अयं च रसः तन्मते लौकिकालौकिकभेदेन द्विविधः । लौकिकसंनिकर्षजन्मा लौकिकः षोढा विषयगतः । अलौकिकस्त्रिधा—स्वाप्तिको मानोरथिक औपनायकश्चेति । अलौकिकः सन्निकर्षो ज्ञानमेव । स चानुभूतेषु साक्षादेव । एतज्जन्माननुभूतेषु प्राक्तनसंस्कारद्वारा ज्ञानमेव प्रत्यासत्तिरिति ।

वस्तुतस्तु—ज्ञानानंदादयो हि आत्मनः स्वरूपानुबंधिनो धर्मविशेषाः । आत्मनिष्ठा धर्माश्च नित्या एव । "नित्या एवात्मनोगुणाः" इत्युक्तेः ज्ञानरूपत्वं, ज्ञानरूपत्वं च ज्ञानवत् स्वप्रकाशत्वात् तद्गुणसारत्वाद्वा । एवमनुकूलतया वेदनी यत्वाद् आनंदरूपत्वमपि । संकोचविकासाभ्यां सत्कार्यवादाभ्युपगमाच्च ज्ञानादीनां नित्यत्वेऽपि उत्पादविनाशप्रतीतेः अवस्थाभेदान्नानुपपत्तिः । एतेन काव्ये नाट्ये च विभावाद्यनुसंधानवशात् अभिव्यक्तमात्मनः स्वरूपानुबंधिगुणभूतं नित्यं सुखमेव रस इति सुलभतया सिध्यति । विभावादिसंवलिततया चर्व्यमाण-मात्मस्वरूपं सुखमेव रस इति तु न नियमः । साहित्यशास्त्रे धर्मधर्मिणोः परमार्थेन ऐक्यव्यवस्थाया अश्रवणात् । किंच आलंबनविभावः रससमवायि-कारणमित्यपि सर्वैः साहित्यकारैः निर्विवादमंगीक्रियते । तच्च घटादिसमवायि-कारणमृदादिनिर्विशेषमेव । रसस्य कार्यविलक्षणत्वं ज्ञाप्यविलक्षणत्वमपि चिंत्यमेव ।

तस्मात् व्यंग्यव्यंजकभावस्याऽपि कार्यकारणभावव्याप्यतया सूत्रस्थ "संयोग" पदस्य कारणसमवेशतया "निष्पत्ति" पदस्य उत्पत्तिपरतया व्याख्याने सर्वं समंजसं भविष्यति ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

विनोदमोदकामोदे
दानवीरचरित्रंनाम मोदकः ।

(निबन्धकः पण्डितभूषण, विद्यालङ्कार, K. S. कृष्णमूर्तिशास्त्री, मथुरा)

'श्रीभगिन्याः पदद्वन्द्वं निर्निद्रार्कसुमप्रभम् ।
स्पृशन्शिरोरुहाग्रेण दानवीरकथां ब्रुवे । ''

अस्ति वेगवत्यास्तीरे कदर्याग्रेसरैर्भूसुरैः परिकीर्णतः कश्चिदग्रहारः । यमधिवसति सततं प्रमथनायो दधदुदरव्यथेश्वराभिधां रममाणस्सार्धं क्षुत्क्षामाम्बिकया । समनुगृह्णाति च स्वाः प्रजा विलोचनेनात्मनस्तार्तीयीकेन । वहोः कालादारभ्य तत्रैवाग्रहारे वंशाभिवर्धनविधिमेव परमं पुमर्थमभिमत्य स्वार्थमात्रसाधने सन्नह्यतां, कथंकथञ्चिदप्युपकारवार्तामश्रुतवतां ब्राह्मणानां विषये प्राहुःषन्ति किंवदन्त्यो नैकविधा लोके । तासामन्यतमामभिधाय प्रधानकथाप्रसङ्गे सकुतुकमवतरामः ।

कश्चित्कर्मकरो निश्रयणीमधिरूढ उत्तानशयस्सन्नकरोत्सुधाविलेपमुपरितले । निर्वर्त्य कृत्यमात्मनीनं सुधादूषिताङ्गो गृहस्वामिनमयाचत किञ्चिदिव तैलमभ्यञ्जनेन सुधामपोहयितुम् । तदानीं गृहपतिः ''रे मूर्ख ! व्ययीकृतवानसि मदीयां सुधां त्वदङ्गविलेपनादनावश्यकत्वेन । अतृप्तस्तावन्मात्रेण पृच्छसि निर्लज्जं तैलमपि । मम सुधाया नाशस्य किं प्रतिब्रूषे ? धाव धाव । तैलमपि नास्ति । भृतिरपि नास्ति '' इति तमभ्यक्रुध्यत् । अयं ब्राह्मणस्तद्ग्रामाभिजनेषु महोदारस्वभावत्वेन यदि परिगण्यते तर्हि तदितरे भूसुराः कथं वर्तेरन्निति यूयमेव निभालयत । किं बहुना, सूत्रप्रायं कथयामि वः । सर्वथा ते सर्वेऽपि ग्रहणैकपरायणाः । अन्यत्किमपि वृत्तं जानीत । तद्ग्रामवासी कश्चिद्ग्रामान्तरस्थं द्रष्टुं स्वबान्धवं रिक्तहस्त एव जगाम । बान्धवश्च बह्वपत्यः (यद्यपि पृथुकभरकरम्बितमाश्वसथं रिक्तहस्तो नोपेयादिति विदितचरं सर्वेषाम् । तथापि नियमोऽय मेततद्ग्रामीणाविषयकः) यावन्न्यविशत सदने, तावदेव बहिर्द्वारमवस्थितः कश्चित्पृथुकः ''मातुल ? किमानीत-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

वानसि मह्यम् " इत्याकृष्य वसनाग्रमपृच्छत् । द्विजोऽयं न केवलमुत्तरितवान्न किमपीति । अपितु शावकशयकुशेयगतं भक्ष्यमपि झटित्यपहृत्य जक्षिति स्म । हन्त ! विवर्णमुखो रुदन्नेव यातः पोतः । कथं वर्तते ! ईदृशी बहून्यवदानानि श्रूयन्ते । आस्तामेतत् । अनुसरामः प्रकृतम् । कश्चिद्दैदेशिको भूसुरो भ्रामं भ्राममनेकेषु ग्रामेष्वन्ततस्तमेतमुपजगाममहात्मभिरलङ्कृतं ग्रामम् । मध्याह्नार्क-मरीचिसन्तप्तः क्षुधा भृशमार्तो बभूव । निरीक्ष्य ब्राह्मणाग्रहारस्य रामणीयकं नितरामतुष्यत्, नूनमत्र ग्रामे, यत्रकुत्रचिन्निकेतने नियतं क्षुदुपहतिर्मेभविष्यतीति। अन्तरात्मापि तस्य शश्वदाम्रेडयामासामुमेवार्थम् ।

सद्यः स्नातानुलिप्तोऽतिथिः प्राविशत्कस्याचित्सदनम् । इत्थमेव नगरेष्व-नाहूता बहवोऽतिथिशिरोमणयः मध्यान्हभोजनावसरे मुक्तलज्जं प्रविश्य याचेरन्नन्नम् । मितंपचाः किं कुर्वीर 'न सज्जीकृतमन्यत्र गच्छे'ति वचनादृते।यद्यपि शास्त्रं जागर्ति " अतिथिः किल पूर्जाहः प्राकृतोऽपि विजानतः " इति । तथापि स्वकीयकालक्षेप एव प्रायः पौराणां दुष्करस्सुतरां भवति । कङ्ख्यकारं घटेतातिथिशास्त्रार्थानुष्ठाने श्रद्धा । अतिथयोऽपि प्रायः यथाकथञ्चिदुदर-पूरणैकपरायणा भ्राम्यन्ति । एतादृशां सदनेषु, चुल्लयस्सर्वदा समलङ्कृता छतातन्तुवितानैः स्युः । एतेषां विदितसर्वधर्माशनशालानां, कथंकथञ्चिदपि व्ययमजानतामनधिरूढधूमशकटादीनां पान्थानां परमः पुरुषार्थोऽभ्यवहार एव नान्यः कश्चिदपि । परान्नपरिवर्धितकलेवराणां लज्जास्वीकारे, न किञ्चि-त्प्रयोजनं क्षुधामरणादृते । अनिवेद्यैव पूर्वमागच्छेयुस्समये पात्रे समिता एते संबन्धिनंमन्याः । समये तस्मिन्निरोधोऽसंभवीति हि तेषामभिमानः । गृहस्था अपि कालक्रमेण विदितैतत्स्वभावास्सर्वे जाग्रति । अर्हणार्हानाराधयन्ति कालनियममनाकलयमानाः अतथाभूतांस्तिरस्कुर्वते विना दाक्षिण्येन । अस्मि-न्समये काचित्क्षुद्रा कथा स्मृतिपथमधिरोहति । दुराचारः कश्चिदतिथिर्झटि-त्यागत्य कस्यचिद्भवने भोक्तुमुपविवेश । तदानीं गृहस्वामी " स्वामिन्नपि स्नानं कृतं भवते'त्यपृच्छत् । आगतः " गोविन्देति सदास्नान'मिति, प्रत्युत्तरं ददौ । कुपितो गृहस्थः "रामामृतं भोजनम् " इत्युदीर्य, त्वरितमपसारयामास ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

स्थाने खल्वेत" यद्विप्रलम्भप्रवृत्तानां विप्रलम्भो विधीयत इति । कष्टकष्टमाकृष्टा-स्सुदूरम् । प्रकृतमनुसरामः पुनरपि । पूर्वोक्तो ब्राह्मणः, बहिर्वेदिकायाः कोणे कुत्रचिदुपविश्यायव्ययविलिखनकर्मणि व्याप्रियमाणधिषणमविगणय्य गृहिण-मन्तः प्रविशन्ददर्श गृहिणीं परिपवनकर्मणि प्रणिदधतीम् । अयाचत च भक्तं " क्षुधाऽऽर्तोऽहमस्मी"ति । गृहिणी तु परमार्थतो मनस्विनी । तावता किम् ? गृहस्थस्तु भवति कृपणो रुष्टश्च । " स्वामिन् ! निषीदति बहिर्वेद्यां रमणः उपसद्य तमनुज्ञां स्वीकृत्यायाहि । मिष्टमन्नं दास्यामि तुभ्य" मिति गिरा सूनृतया प्रत्युवाच । किमेतदापतितमित्यन्तरुद्भूतां नियच्छन्भीतिं, बहिस्तुष्य-न्निव निगदन्नोमिति, बहिरागत्य गृहस्थमयाचत । लपितुमप्यलसः, किमर्थं वृथा व्ययो वाच इति मन्वानो वा, भवन्नेव तूष्णीं अङ्गुल्या केवलं निरदिश-त्कस्यचन वदान्यस्य सदनम् । सद्यो विषण्णोऽपि ब्राह्मणः, निर्दिष्टमेवागारं प्रविशन्दिष्ट्या प्राप्तपर्याप्तभोजनो निर्दिष्टवन्तमपि दातारमिव मनसा समनुगृह्ण-न्जगाम । विपुले तस्मिन्नप्रहारे गृहस्थ एक एव स स्नुहिवने सन्तान इवाबभासे । हायनेषु गतेषु कतिपयेषु सोयमङ्गुल्या निर्देशको धार्मिकः कालवशं प्राप्तः । आनीतो यमदूतैर्वैवस्वतस्य भगवतस्सदसि । निरीक्ष्य चित्रगुप्तं कृतान्तः किमनेन कश्चिदाचरितो धर्म इत्यप्राक्षीत् । पुस्तके पृष्ठमेकैकमप्यविहाय पश्यंश्चित्रगुप्तः " भवे पूर्वस्मिन्नतिथये कस्मैचिद्दर्शयामास वदान्यस्य सदनमेक-मङ्गुल्या, तमृते न कोप्यनुष्ठितो धर्मोऽनेने"ति जगाद । श्रुत्वा दण्डधरोऽप्या ज्ञापयमास " मानयत केवलमङ्गुलीम् । प्रपीडयतास्य सर्वाण्यङ्गानीति " । सद्यः किङ्करा भयङ्करास्तमाबध्य पाशैराकृष्य पथि कण्टकित इतस्ततो भित्त्वा छित्वा वन्हिसात्कृत्य, दंशयित्वा च वृश्चिकादिभिः बहुविधमपीपिडन् । अस्याङ्गुलीं केवलं सभक्तिश्रद्धातिशयमाराधयामासुरनवधिकैरुपचारैः स्रक्चन्द-नादिभिरलङ्कृत्य । इतराङ्गेष्वसहमानो निरयवेदनां निर्मर्यादामवोचद्यमकि-ङ्करान् " पुण्यं भविष्यति युष्माकं, स्थापयत कृपया मां पुरतो वैवस्वतस्य । काचिदस्ति विज्ञप्तिरि"ति । तेऽप्यनुनयसहस्रेण किञ्चिदिव प्रसन्नात्मानस्तथैवा कार्षुः । को विशेष इति पृष्टो यमेन, " भगवन्कृपया भूयो मामवतारय भुवि

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

मामके सदने । अमिततमेन द्रविणेन मदीयेन निर्मास्यामि प्रतिगोष्पदं ब्राह्मणेभ्यो वह्नीर्धर्माशनशालाः । अधुनैव ज्ञातवानस्मि धर्मस्य परं पारम्यमि''ति सप्रश्रयं व्यजिज्ञपत् । यमोऽपि किङ्करिष्यत्ययं कृपणः, पश्यामस्तावदिति कलयमानः तथैव भुवि तमवातारयत् । पुनः प्राप्तभूलोकोऽयं धनाढ्यो गृहस्थो यथा पूर्वमेव स्वीयं कृत्यं निर्वर्तयन्नास्त । यमानुग्रहेण, प्रतिश्रवविषयिका प्रज्ञा नैवालुप्यत । अत्रान्तरे, कश्चिदतिथिरेत्यास्य सदनमयाचत किञ्चदन्नम् । अपश्यद् गृही "पूर्वमङ्गुल्या निरादिशं दातुर्गृहं कस्मैचन । तत्फलत्वेन समर्हणा महत्यभूदङ्गुल्याः । यद्यहमधुना समग्रैरङ्गैर्दर्शयेयमस्मै वदान्यसदनं, नियतमुपचारो निष्प्रत्यूहं भविष्यत्येशषाणावयवाना" मिति । सद्यः स उत्थायाग्रतः पृष्ठतः पार्श्वतश्च परिवर्तमानो नृत्यन्निर्देष्टुं प्रारभत । वस्त्रविगलनमप्यावश्यकं बभूव समग्राङ्गोपचारस्य यमपुरे लिप्सया । अभ्यागतस्तु किमयमजनिष्ट भूताविष्ट इति विभ्यत्तूर्णं दुद्राव दूरत इति शिवम् ।

इतिविनोदमोदकामादे दानवीरकथानाम षष्टः मोदकः ।

एरंडेल न घेतां

जंत पाडणाऱ्या पुडीची

किंमत १॥ आणा.

रात्रीं साखरेबरोबर घेतल्यानें शौचास साफ होऊन बारीक मोठे जंत पडतात.

एरंडेल घेण्याची जरूरी नाहीं.

स्टार कंपनी बेळगांव.

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

तृष्णाविडम्बनम् ।

(विद्वान् क. वे. कृष्णमूर्तिशास्त्री. प्रा. वि. सं. मन्दिरम् पुना)

सूर्याचन्द्रमसोरहर्दिवमगात्कालो महान्भ्राम्यतो-
र्जीवानां तु वयो विधातृविहितं क्षुद्रं भवाम्भोनिधौ ।
यावन्नः किल भालपट्टलिखितं भोग्यं विधात्रा धनं
तस्माददभ्यधिकं लभेमहि कथं स्वप्नेऽपि किं तृष्णया ॥१॥

द्रव्यं प्राक्तनपुण्यसंचयवशाल्लब्धं जना भुञ्जते
ऽनल्पं तत्पुरतो दरिद्रति परं त्वन्ये सदा दुर्भगाः ।
भोज्ये वस्तुनि संचितेऽप्यचलवत्किं तत्क्षुधा पीडिताः
शक्ता लेढुमरं प्रविश्य सदनं कौलेयका जिव्हया ॥२॥

आकिञ्चन्यहता अटन्ति जठरं प्रातुं हि सर्वा दिशः
आ सेतोस्तुहिनाचलावधि नरास्तृष्णाभिभूता भुवि ।
लब्धुं किं त्वपथेन चेदनवधि द्रव्यं यतेरन्द्रुतं
किं स्वप्नेऽपि घटेत हन्त न हि तन्मूर्खाः स्मरन्त्यण्वपि ॥३॥

आढ्याकिञ्चनयोः प्रभेदविकलं सर्वान्तरङ्गाङ्गणे
नृत्यन्ती जनताविमोहनपरा कृत्स्नं जगद्व्याश्नुषे ।
तृष्णे ! देवि ! शमादयो हि बहवः प्रत्यर्थिनस्तेऽनिशं
निर्मूलीकरणाय जाग्रति वृथाऽखर्वं न गर्वं वह ॥४॥

रेखान्तर्गतरिक्तकोष्ठनिवहान्संमुद्रितान्वञ्चकैः
केचिद्धरिधनेप्सया पिपुरति प्रज्ञोहितैरक्षरैः ।
यः कश्चिल्लभतेऽप्रतीक्षितधनं चेत्काकतालीयक-
न्यायाद्धन्त भवन्ति खिन्नमनसः स्वल्पप्रमादैः परे ॥५॥

मेरुं स्वर्णमयं वदन्ति विबुधा अद्रिं, तथा राजतं
कैलासं च तयोः प्रदानमपि किं तुष्ट्यै नराणामलम् ? ।
वस्तूनां परिमाणकल्पनविधिश्रान्तो ध्रुवं पद्मभूः—
ततत्ते नैककृतावबाप्य विदधे तृष्णेऽमितां जामिताम् ॥६॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

विस्तीर्णा बहुवाहिनां खनियुतां संपन्नकैदारिकां
रम्यां सर्ववसुंधरां निजवशे नेतुं त्वया प्रेरिताः ।
राजानो यदि नित्यमेव समरैस्तृष्णे ! जगत्क्षोभकाः
प्रादेशोदररक्षणव्यसनिनां का निर्धनानां कथा ॥७॥

अद्य श्वः कतिभिश्चिदेव दिवसैर्लप्स्ये प्रभूतं धनं
मत्वैवं स्वकजीवितार्थमवनौ केचिद्धनादर्जितात् ।
स्वल्पं लोष्टसमं किरंति महन्ति प्रत्याशया दुर्लभे
वैचित्र्यं किमिहान्यदस्ति धरणावाश्चर्यहेतुर्नृणाम् ॥८॥

त्वत्सेवाहतबुद्धयोऽपि जनकापायोद्यता बालिशाः
कुर्वन्तः कलहं चिराय वसुने शार्दूलवद्भ्रातृभिः ।
दृश्यन्ते कति नेह धातुकगणा वंशे कलङ्कायिताः
कस्य क्षेमविधित्सयाऽत्र भवतीं तृष्णेऽसृजत्पद्मभूः ॥९॥

पालित्येन हतेऽपि मूर्ध्नि, दशनैरिक्तेऽपि तुण्डे, दृशोः
प्रक्षीणेऽपि च पाटवेऽप्यपघने जीर्णेऽपि पुंसां भुवि ।
कान्ताभूमिधनादिषु स्थिरतरा भ्रान्तिः परं जृम्भते
हन्तेदं जगदेव ते विलसितैस्तृष्णे ! पराभूयते ॥१०॥

ಸುಬೋಧ

ಶ್ರೀಷ್ಟವರ್ಗದ ಮಾಸಪತ್ರಿಕೆ.

ಸಂಪಾದಕರು:—ಶ್ರೀ. ಯ. ರಾಮರಾಯರು.

ಧಾರ್ಮಿಕ, ನೈತಿಕ, ಸಾಮಾಜಿಕ, ಮತ್ತು ವಿದ್ಯಾವಿಷಯಕ ಪ್ರೌಢ ಲೇಖನಗಳು ಕಥೆ, ಕವಿತೆ, ಏಕಾಂಕ ನಾಟಕಗಳು, ಮಿಮರ್ಶೆಗಳು ಸಹ ಪ್ರಕಟವಾಗಿ ಪ್ರತಿ ತಿಂಗಳು ಮೊದಲನೇವಾರದಲ್ಲಿ ಹೊರಡುವದು. ವಾರ್ಷಿಕ ಚಂದಾ ಉತ್ತಮ ಪ್ರತಿ ೩—೦—೦ ಸಾಮಾನ್ಯ ಪ್ರತಿ ೧—೮—೦ ಅಂಚೆಹಾಸಲು ಉಚಿತ ಹೆಚ್ಚು ವಿವರಗಳಿಗೆ ಬರೆಯಿರಿ.

ಸುಬೋಧಪ್ರಕಟನಾಲಯ,
ಚಾಮರಾಜಪೇಟೆ ಬೆಂಗಳೂರನಗರ

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

स्वर्गे गन्धर्वाप्सरसां सत्ता

निबन्धाः—श्रीदीनानाथशर्म्मा शास्त्री सारस्वतः (विद्याभूषणम्, विद्यावागीशः)
(स. ध. कालेजोपाध्यायः, मुलतानसिटी.)

पुराणेषु गन्धर्वाणामप्सरसां च वर्णनं समागच्छति। अथ च तत्र एतदप्युक्तं यत् सत्कर्म्मभिर्जनाः स्वर्गं लभन्ते, तत्र ते अप्सरोभिर्विहरन्तीति। वादिनोऽत्रापि सन्दिहानाः सन्ति; ते एतदादिकं पुराणकपोलकल्पनामात्रं मन्यन्ते। वयमत्रापि विमृशामः।

अथर्व्ववेदे लिखितम् 'स्वर्गे लोके बहुस्त्रैणमेषाम्' ४।३४।२ अत्र स्वर्गलोके देवानां बहुस्त्रीकथनात् स्वर्गलोकस्तत्स्था अप्सरसश्च सिद्धाः।

न्यायदर्शनेऽपि प्रोक्तम्—स्वर्गः, अप्सरसः,...इत्येवमादेरप्रत्यक्षस्यार्थस्य न शब्दमात्रात् प्रत्ययः, किं तर्हि आप्तैरयमुक्तः शब्दः इत्यतः सम्प्रत्ययः' २।१।५२। एतेन स्वा० दयानन्दसम्मतवात्स्यायनभाष्येण स्वर्गस्थाऽप्सरसां समूलकता सिद्धा।

एतस्मादपि अधिकस्पष्टता स्वा० दयानन्दमान्येन महाभाष्यकारेण भगवता पतञ्जलिनाऽत्र विषये कृता। तथाच 'इज्यायाः किञ्चित् प्रयोजन मुक्तम्। किम्?। स्वर्गे लोके अप्सरस एनं जाया भूत्वा उपशेरते' ९।१।८४ सूत्रे। हंहो! कियती स्पष्टता सनातनधर्म्मसिद्धान्तस्य। यज्ञस्य फलं स्वर्गोपि सिद्धः; तत्र अप्सरःप्राप्तिरपि च सिद्धा।

स्वा० दयानन्दस्य मान्येन योगदर्शनेन तत्स्थव्यासभाष्येण तु अत्र अन्यापि स्पष्टता कृता। तथाच "तत्र पाताले जलधौ पर्वतेष्वेतेषु देवनिकाया असुरगन्धर्वकिन्नरकिम्पुरुषयक्षराक्षसभूतप्रेतपिशाचाऽस्मारकाऽप्सरोब्रह्मराक्षस-कूष्माण्डविनायकाः प्रतिवसन्ति" योगदर्शने विभूतिपादे २६ सूत्रे। हंहो! कियती स्पष्टता। अग्रे दृश्यताम्—'मधुमतीं भूमिं साक्षात्कुर्वतो ब्राह्मणस्य स्थानिनो देवा उपनिमन्त्रयन्ते, भोरिह आस्यताम्, इह रम्यताम्, कमनीयोऽयं भोगः, कमनीयेयं कन्या, रसायनमिदं जरामृत्युं बाधते, वैहायसमिदं यानम्, अमी कल्पद्रुमाः, पुण्या मन्दाकिनी, सिद्धा महर्षयः, उत्तमा अनुकूला

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

अप्सरसः, दिव्ये श्रोत्रचक्षुषी प्रतिपद्यताम्, इदम् अक्षयमजरम् अमरस्थानं देवानां प्रियम्' योगदर्शने ३।५१ हंहो! कियती स्पष्टताऽत्र। अस्मादधिकं किं वर्ण्येत? योगदर्शनस्थं व्यासभाष्यमक्षरशः प्रमाणं मन्यते स्वा. दयानन्दः, व्यासदेवं च सत्यवादिनं मन्यते इति गतनिबन्धे त्वस्माभिर्निर्दिष्टम्। तेन अप्सरसां स्वर्गलोके सत्ता समूला सिद्धा।

'ताभ्यां गन्धर्वपत्नीभ्योऽप्सराभ्योऽकरं नमः' अथर्व० २।२।५ इति गन्धर्व्वाणामप्सरसां च सिद्धिः। 'अप्सरास्वपि गन्धर्व आसीत्' अथर्व० २।२।३ 'ऋक्षेभ्यो यक्षेभ्यः पिपीलिकाभ्यः पिशाचेभ्योऽप्सरोभ्यो गन्धर्वेभ्यो गुह्यकेभ्यः शैलेभ्यः पन्नगेभ्यः' मानुषगृह्यसूत्रे २।१२।१८। अत्रापि स्पष्टं गन्धर्वाप्सरसां नाम। 'तस्याऽप्सरसो विशः, ता इमा आसते इति युवतयः शोभना उपसमेता भवन्ति' शतपथ० १३।४।३।८। 'या विश्वावसुं गन्धर्वं सचध्वे। ताभ्यो वो देवीर्नम इत् कृणोमि' अथर्व० २।२।४ इति गन्धर्व्वैः सह अप्सरसां सम्बन्धः, विश्वावसुर्गन्धर्वोऽपि प्रसिद्ध एव। गन्धर्वस्त्वा विश्वावसुः परिदधातु' शतपथ० १।३।७।२ इति विश्वावसुगन्धर्व्वादीनां सत्ता।

'गन्धर्वा गुह्यका यक्षा विबुधानुचराश्च ये। तथैवाप्सरसः सर्वा राजसीषूत्तमा गतिः' मनु. १२।४७ इति गन्धर्वाप्सरसोपि मनुष्यभिन्ना योनिः सिद्धा। निरुक्ते ३।८।१ पञ्चजना इत्यनेन 'गन्धर्वाः पितरो देवा असुरा रक्षांसि' केषाञ्चिन्मते गृह्यन्ते, केषाञ्चिन्मते च चत्वारो वर्णा, निषादः पञ्चम इतीमे गृह्यन्ते। एतेनैषां परस्परं भेदोपि सिद्धः। अन्यथा एषामपि मनुष्यत्वे ब्राह्मणक्षत्रियवैश्यशूद्रनिषादताऽनपायाद् यास्कस्य भिन्नभिन्नमतभेदप्रदर्शनं व्यर्थमभविष्यत्। तेन मनुष्यादियोनिभ्यो गन्धर्वादियोनीनां सत्तापि सिद्धा।

'मेनका त्रिदशेष्वेव त्रिदशाश्चानु मेनकाम्। मयैवोद्विज्यते जन्म दुष्यन्त! तव जन्मनः' महाभारते आदिपर्व्वणि ७४।८४। 'क्षितावटसि राजेन्द्र! अन्तरिक्षे चराम्यहम्। आवयोरन्तरं पश्य मेरुसर्षपयोरिव' ७४।८५ इति शकुन्तलावाक्यं दुष्यन्तं प्रति। इति मनुष्याप्सरसोर्भेदः।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

वेदे प्रसिद्धाप्सरसां नामान्यपि प्राप्यन्ते । तथाच 'मेनका च सहजन्या चाऽप्सरसौ' यजुः १४।१५ 'उर्वशी च पूर्वचित्तिश्च अप्सरसौ' यजुः १४।१२ 'उर्वशी वै रूपिणी अप्सरसाम्' महाभाष्ये ५।२।९५ इति स्म्भादम्भापसारिणीनामप्सरसां वर्णनम् । 'तं पञ्च शतान्यप्सरसां प्रति धावन्ति' कौ० ब्रा० १।४ ।

'नैनं घ्नन्त्यप्सरसो न गन्धर्वा न मर्त्याः.....यो बिभर्ति इमं मणिम्' अथर्व० ८।५।१३। अत्र गन्धर्वाप्सरोभिः सह पृथक्त्वेन 'मर्त्य' ग्रहणाद् गन्धर्वाप्सरसां मर्त्ययोनिव्यतिरिक्तत्वम्, मणिप्रभावश्च सूचितः । 'जाया इद् वो अप्सरसो गन्धर्वाः पतयो यूयम् । अपधावत अमर्त्या ! मर्त्यान् मा सचध्वम्' अथर्व ४।३७।१२ इति गन्धर्वाणामप्सरसां च सिद्धिः १०, अप्सरसां च गन्धर्वपत्नीत्वम्, गन्धर्वाणाम् अप्सरसां च मनुष्यव्यतिरिक्तत्वम् ।

चरकसंहितायामुक्तम्—'अवलोकयन्तो देवा जनयन्त्युन्मादम्, गुरुवृद्धसिद्धर्षयोऽभिशपन्तः, पितरो धर्षयन्तः स्पृशन्तो गन्धर्वाः, समाविशन्तो यक्षाः, राक्षसास्तु आमगन्धमाघ्रापयन्तः, पिशाचाः पुनराधिरुह्य वाहयन्तः, निदानस्थाने ७।१४ इति गन्धर्वयक्षपिशाचादिसिद्धिं तत्कर्तृकोन्मादं च उपवेद उपोद्बलयति । 'उन्मादयिष्यतामपि खलु देवर्षिपितृगन्धर्वयक्षराक्षसपिशाचानां गुरुवृद्धसिद्धानां वा एष्वन्तरेषु अभिगमनीयाः पुरुषा भवन्ति' चरक० निदान० ७।१६। अत्रापि सैव वार्त्ता ।

कं ॐ खलु कथयितुमर्हति यत्—सनातनधर्म्मस्य वार्त्ता ॐ केवलं पौराणिक्यः, कपोतकल्पनामात्रप्रसूताः, अशास्त्रीयाः, अवैदिक्यो वा । सनातनधर्म्मस्य तु प्रत्येकसिद्धान्ता वेदानां प्राचीनशास्त्राणां च अक्षरेऽक्षरे व्याप्ताः । ते जना ये सनातनधर्म्मं निर्म्मूलं मन्वते, तदीयसिद्धान्तान् पुराणमात्राधारकान् ब्रुवते ते सनातनधर्मेण सह ईर्ष्याद्वेषवन्तो वा । वेदादिशास्त्राणि कदाचिदपि न दृष्टवन्तो वा, अत एव अबहुश्रुताः, अथवा निजपक्षसाधनाग्रहग्रहिलाः, पक्षपातकलुषितशेमुषीका वा । यावत् प्राचीनसंस्कृतसाहित्यं जीवति, तावत् सनातनधर्म्मोपि जीवति । कः कियदवधि अर्थान् परिवर्त्तयिष्यति व्याजमाक् ? । शम् ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

संस्कृतभाषा

(क. श्रीकृष्णस्वाम्यय्यंगार्यमहाभागः सुभाषिणीसम्पादकः बेंगळूर)

सकलगुणसमग्रा कल्पनाकल्पवल्ली
बुधवरवरिवस्यालब्धकीर्तिप्रकर्षा ।
समुदितरसभावालङ्कृता जातशोभा
कविगणबहुमान्या भारती देवतानाम् ॥१॥

रुचिरवचनजालाकृष्टविद्वत्समाजा
कथककुलकृतीनां जन्मभूरद्भुतानाम् ।
सरलपदनिगुम्फा प्रीतिमातन्वती नः
परिचितकरुणानामिच्छति प्रेमबन्धम् ॥२॥

या भाषा भुवि भारतीयजनतोद्धाराय पर्याप्नुते
यामेवासकृदर्चयन्ति कवयः काव्यप्रसूनैस्स्वकैः ।
यस्यास्सम्प्रति निर्विशेषकरुणालक्ष्याणि विख्यापितः
प्राधान्यं समुपागताः शिशुपदे भाषा निविष्टास्समाः ।३।

यामन्तरा जगति संस्कृतिरस्मदीया
नावाप्नुते कथमपि स्वगुणैः प्रशस्तिम् ।
सा देवलोकमहिता भणितिर्महार्घा
नाम्नाऽपि नैव लभते भुवि नोऽवकाशम् ॥४॥

आकल्पान्तस्थायिनीं यामनर्घां
वाणीं वीणानादरम्यां भणन्ति ।
सैवेयं नस्साहसिक्येन सद्यः
क्षीणक्षीणा संप्रणाशं जगाम ॥५॥

वचनेषु वीरभावेनालमनेनानुवर्तमानेन ।
सपदि परिगृह्य दीक्षां प्रयत्नमास्थाय कीर्तिराप्तव्या ६

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

आधुनिक विद्वत्परिचयः

विद्याभूषणपदविभूषिता "रड्डी" इत्युपाह्वा रङ्गाचार्याः ।

लेखकः—पं. पुरुषोत्तमशास्त्री रानडे. आनन्दाश्रमः पुण्यपत्तनम्

आस्ति महाराष्ट्रे सरिद्वरकृष्णातटे विराजमाना श्रीविष्णुगणपतिप्रमुख-देवतानां हृदयहारिभिर्मन्दिरैः समलङ्कृता, श्रुतिशास्त्रादिविद्यापारदृश्वभिस्तपसां मूर्तिमद्भिः पुञ्जैरिव भूसुरैः शोभमाना वैराज—(वाई)-पुरी नाम । तत्र निवसन्ति स्म श्रीरड्डीकुलङ्कारायमाणाः सावित्रीनृसिंहसमासादितजनुषो लक्ष्म्या नाम भार्यया संसेवितचरणा व्याकरण-धर्मशास्त्र-वेदान्तादिविषयपरिनिष्ठितप्रज्ञाः सुगृहीतनामधेया बालकृष्णाचार्या नाम ।

बालकृष्णाचार्याणां पूर्वजा अपि विविधशास्त्रेषु विशारदा आसन् । येभ्यः किल श्रीशम्भु—(सम्भाजी)—सुतेन च्छत्रपतिशाहूमहीपालेन विद्वज्जनैकपक्षपातिना वैराजक्षेत्रतो नातिदूरान्तरवर्ती 'मुगांव' नाम ग्रामो वंशपरम्परयोपायनीकृतः ।

एवं रड्डीकुलसम्भूताः केचन विद्वद्वरा न केवलं वैराजक्षेत्रे परं निखिलेऽपि सप्ततार—(सातारा)—विभागे स्ववैदुष्येण स्वप्रभावेण च वशीकृतबहुजनान्तरङ्गा लब्धास्पदाः सम्पादितकीर्तयश्च विजयन्ते स्म । एतद्धि खल्वेतेषां वैदग्ध्यमाहात्म्ययोर्निदर्शनं यदेतैः सप्ततारविभागे धर्माधिकारित्वं श्रीशाङ्करमाध्वोभयमठाधिपतित्वं च समुपार्जितम् ।

बालकृष्णाचार्याणां सहधर्मिणी शालिवाहनस्य १७९२ तमे वत्सरे श्रावणकृष्णैकादश्यां सद्विद्या विनयमिव, प्राचीवार्कं वा, प्रासूत सुतं रङ्गाचार्यं नाम । सप्ततार—(सातारा)—निवासिनो भारतवर्षप्रथितयशसो गजेन्द्रगडकर-कुलस्य रड्डीकुलस्य चासीत्किल शारीरः सम्बन्धः । तदानीं किल रङ्गाचार्याणां मातामहा गजेन्द्रगडकरकुलावतंसा रामाचार्याः पण्डितप्रवरा ग्वाल्हेरनगरे राजसभापण्डिता आसन् । तेषां सविधे रङ्गाचार्याणां चतुर्वर्षोत्तरं सप्तमं वर्षं यावद्बाल्यमत्यगात् । ततो वैराजक्षेत्रे समुचितकाले कृतोपनयनान् रङ्गाचार्यान्पितृचरणा बालकृष्णाचार्या अध्यापयितुमारेभिरे । सम्पादितसिद्धान्तकौमुदी-कौस्तुभाद्यध्ययना रङ्गाचार्याः सप्ततार—(सातारा)—नगरे गजेन्द्रगडकरकुल-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

ललामभूतेभ्यो विद्वन्मुकुटमणिभ्यो बालाचार्येभ्यः परिभाषेन्दुशेखरं साहित्य-शास्त्रीयान्कांश्चन ग्रन्थांश्चाशिक्षन्त। द्वैतशास्त्रीयप्रबन्धांश्च पण्डितप्रवरेभ्यो विद्वन्मण्डलीमण्डनायमानेभ्यो गजेन्द्रगडकरोपाह्वानन्ताचार्येभ्योऽधिजगिरे। ततः पुण्यपत्तने निखिलभारतभूषणभूतेभ्यः श्रीमहामहोपाध्यायपदसमलङ्कृते-भ्योऽभ्यङ्करोपाबाह्वासुदेवशास्त्रिचरणेभ्यः शब्देन्दुशेखरं मुक्तावलीं चाध्यगीषत। एवं समभिलषिततत्तच्छास्त्रीयग्रन्थानधीत्य वडोदरनगरे श्रावणमासराजकीय-परीक्षायां व्याकरणशास्त्रविषये सकलपरीक्षासु तथाऽलङ्कारशास्त्रेऽप्येते सम्यगु-त्तीर्णाः। अथ पुण्यपुरे वेदशास्त्रोत्तेजकसभायां व्याकरणस्य कक्षाद्वये, साहित्ये च समुत्तीर्य प्रभूतं यशः सम्पादितमेतैर्महाभागैः। एवमधिगताधिगन्तव्या धीमन्तो रङ्गाचार्या अनुपदमेव ऐशवीये १८९७ मिते वत्सरे राजकीयाङ्ग्ल-शालायां संस्कृतविषयाध्यापकपदमलभन्त। तदर्थं सोलापूर–(१९००) सातारा–(१९०९) मुम्बापुरी–(१९११) स्थितासु राजकीयाङ्ग्लशालासु, तथा च 'फीभेल् ट्रेनिङ्गकॉलेज (१९१४) हायूस्कूल फॉर इण्डियन गर्लस्' (१९२०) इत्याख्ययोः शालयोः पुण्यपत्तनेऽन्यत्राप्यध्यापनकार्यं निजविद्वत्तानुगुणं सम्यक्सम्पादितमेतैः। श्रूयते च यन्मधुरया ललितया प्रसादान्वितया च वाण्या यदैते महाभागास्तत्तद्विद्यालयेषु विद्यार्थिजनचेतःकुहरे कमपि ब्रह्मानन्दसहोदरं प्रमोदभरं समुत्पादयन्तः संस्कृतविषयमपाठयंस्तदा विस्मृतवेदान्तराश्छात्रास्तदेकदत्तमनस्काः शीर्षान्दोलनपुरःसरं शृण्वन्ति स्म पाठनमेतेषाम्। एतादृशी महाभागानामेषां पाठनमाधुरी विषयसुगमीकरणचातुरी चानुभूता तत्र तत्र स्थितैश्छात्रैः। दुरधिगमा खलु संस्कृतभारती, विविध-नियमजालजटिलं च तद्व्याकरणमिति यद्बहु बहुभिर्घण्टाघोषं जोघुष्यते तद्वृथै-वेति निश्चप्रचम्। 'वक्तुरेव हि तज्जाड्यं श्रोता यत्र न हृष्यति।' इत्यभियुक्तोक्त्यनुरोधेन यस्य पाठनकाले निर्विद्यन्ते श्रोतारस्तत्र वक्तुरेव वैगुण्यमित्यवगन्तव्यम्। यदि पुना रङ्गीशास्त्रिसदृशा अध्यापकाः स्युस्तर्हि के वा छात्रा अन्ये वा धृष्णुयुः प्रजल्पितुं यद् गीर्वाणवाणी कठिनतरा, तस्या व्याकरणं च दुरधिगममिति। अलं पल्लवितेन वस्तुन्यस्मिन् रङ्गाचार्यशर्मण.

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

समनुभूततत्पाठनकालिकज्ञानसुधामधुरिम्णां सारासारविवेकपटीयसी मतिरेव साक्षिणी ।

ततः शास्त्रिमहाशयानामसाधारणेन पाठनपाटवेन प्रमुदितान्तरङ्गाः शिक्षणाधिकारिणः कृततत्कार्यस्य तेभ्यः पारितोषिकमिव प्रदातुकामाः १९२० खिस्ताब्दे कर्नाटकीयमहाविद्यालये [धारवाड कॉलेज] संस्कृताध्यापकपदे न्ययूयुजन् महाभागानेतान् । युक्तरूपं चैतद्'द्रत्नं काञ्चनेन सङ्गतम् । '

यदा खलु प्रस्तुतशास्त्रिवरेण्याः कर्नाटकमहाविद्यालयेऽध्यापक-पदवीमारूढास्तदा तेषां नासीत् कर्नाटकभाषायां परिचयः । परं रङ्गाचार्याः सुगमसंस्कृतभारत्या विद्यार्थिनिकुरम्बं मातृभाषानिर्विशेषं तथाऽ पाठयन् , यथा तेऽशेषा अपि महाविद्यालयीयाच्छात्राः संस्कृत-भाषया पाठनायैव सोत्कण्ठं स्पृहयन्ति स्म, न तथा कर्नाटकभारत्याऽध्यापनाय । तदाप्रभृति षट् संवत्सरान् यावत्तत्राध्यापकपदं विभूष्य सम्पाद्य च महनीयं यशः पुण्यपुरे ' डेक्कन ' संज्ञकराजकीयमहाविद्यालयेऽध्यापकपदाधिष्ठिता-स्तत्रापि स्वगुणगौरवानुगुणं महीयसीं कीर्तिमविन्दन् । ततः १९३० तमे खिस्ताब्दे सेवानिवृत्तिमङ्गीकृत्य वैराजक्षेत्रनिवासे मतिं बबन्धुः ।

प्रियमहाशयाः! अवितथा खल्वेषा कविकुलगुरोः कालिदासस्योक्तिः— " प्रायेण सामग्र्यविधौ गुणानां पराङ्मुखी विश्वसृजः प्रवृत्तिः " इति । अविरतप्रयासेन समुपार्जितं निसर्गोपपन्नमपि वा सुखं न खलु चिराय स्थिरतां भजते । तद्धि वञ्चयति निजैर्विविधैर्विलासैरकाण्ड एव सकलमपि जीवलोकम् । विद्यया वपुषाऽधिकारेण सन्तत्या सम्पत्याऽपि च सर्वथा विभवभा-जनीभूतान् रङ्गाचार्यमहाशयान् हन्त, अकाण्डं एव विरहय्य भर्तृदेवविभवेन परां किल कोटिमधिरूढा प्रमोदातिशयस्य तत्सुखमसहमानेनैव दैवहतकेन दिवं नीता तेषां सहचारिणी १९१३ तमे खिस्ताब्दे ।

हा धिक् कष्टम् । तप्ते गोपयसि गोक्षुरकण्टकार्थितं तेन प्रसङ्गेन । अथ सत्यपि सर्वत आनुकूल्ये, द्वितीयोद्वाहे, न किल मतिमकार्षुर्धीरप्रकृतयः शास्त्रिप्रवराः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

श्रीरङ्गाचार्यशास्त्रिभिर्महाराष्ट्रभाषाविभागे सविशेषं पदं प्रक्षिप्तम् । शनैः शनैश्चैतेषामुभयभाषाप्रावीण्यपरिमलो विमृत्वरोऽभूत् । आङ्गल-शालामहाविद्यालयादिषु विदधत्स्वप्यध्यापनकार्यं श्रीरङ्गाचार्येषु सततं विधिविषयपर्यालोचनपुरःसरः प्रबन्धलेखनादिकः सरस्वतीप्रणयप्रेरितो व्यासङ्ग-गस्तावत्प्रचलति स्मैव । 'मृच्छकटिकम्,' 'मालविकाग्निमित्रम्,' 'काव्यादर्शः' ग्रन्थत्रयमेतच्छ्रीरङ्गाचार्यमहाशयाः समटीकन्त सरसमधुरया व्याख्यानसरण्या । मूलग्रन्थहृदयं प्रदर्शयन्ती हृदयङ्गमा चैषां व्याख्यानसरणिः । मन्ये यदेभि-र्व्याख्यातं कमपि ग्रन्थं तद्वद्व्याख्यानसाहाय्येन यदिच्छात्राः सुनिपुणमभ्यस्ये-युस्तर्हि तद्ग्रन्थगतमशेषमपि रहस्यं प्राध्यापकानिरपेक्षं समवगन्तुमीशीरन् । 'श्रीब्रह्मसूत्रमाध्वभाष्यं जयतीर्थकृतटीकासहितं' न्यायशास्त्रे भावसर्वज्ञकृतो 'न्यायसारः' एतद्ग्रन्थद्वयं पण्डितवरैरेभिर्महाराष्ट्रभाषया सुगमं विस्तृतं च प्रभूततरटिप्पन्यादिभिरलङ्कृतमनूदितम् । अनन्यसाधारणं कार्यं चैतद्यन्माध्व-भाष्यस्य महाराष्ट्रभाषयाऽनुवादो नाम । माध्वसम्प्रदायप्रणायिनामनाकलितसंस्कृ-ताध्ययनानामन्येषां वा जिज्ञासूनां बहूपकुर्यादसौ भाष्यानुवादः । न्यायसारानु-वादोऽपि विषयस्फुटीकरणोपयोगिनीभिः सविस्तरटिप्पनीभिरुपेतो न्यायशास्त्रीय-निगूढतत्त्वान्यवगमयितुं मार्गदर्शकायते ।

छन्दःशास्त्रेऽपि प्रभवति पुनरेतेषां मतिप्रकर्षः । कविप्रवरजेगीयमान-कीर्तेः 'रामजोशी' महाभागस्य 'छन्दोमञ्जरी' शास्त्रिमहाभागैर्विस्तृत-टिप्पण्यादिभिरुपबृंहिता च प्रत्याययति खल्वेतेषां छन्दःशास्त्रीयाधिकारम् । तथा च कालिदास-भवभूति-भट्टनारायणादीनां कविकुलभूषणानां नाटकानि निमित्तीकृत्य प्रगाढविमर्शात्मकाः प्रकाशिता विविधनिबन्धा एतैः । सर्वेऽप्येते पाण्डित्यपूर्णाः प्रबन्धाः । तथा हि 'भास कीं आभास' इत्यादयो निबन्धा अपि बुद्धेः सुसूक्ष्मत्वमवबोधयन्ति शास्त्रिवरेण्यानाम् । गच्छता कालेन शार्मण्य (जर्मन) पण्डितेषु कविश्रेष्ठभासचरितविषयमुद्दिश्य प्रचलित ऊहापोह तत्र शास्त्रिवरैः प्रणीतस्यास्य 'भास कीं अभास' नाम निबन्धस्य सादरं किल निर्देशो व्यधायि । अपि च श्रीपराडकरमहाशयैर्महाराष्ट्रकविप्रवरस्य मयूरस्य

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

काव्यग्रन्थसम्पत् प्राकाशि । तदा रङ्गाचार्यैः केचिद्रामायणीयकाव्यप्रबन्धा दुरधिगमशब्दार्थज्ञानाय टिप्पनीभिः संयोज्य सुगमीकृताः ।

माध्वसिद्धान्ततत्त्वानि, तदीया विशिष्टा धर्मास्तथाचारा मन्दमध्याधिकारिभिर्ज्ञातुमशक्यसम्भवा इति सम्भाव्य तानुनुग्रहीतुं 'श्रीमध्वसिद्धान्तसुधाकर' नाम नियतकालिकं, तदीयसकलकार्यभरं स्वयमेवोद्वा श्रीरङ्गाचार्या महीयसोत्साहभरेण समचालयन् । तत्रत्यान् सरसमधुरानुपन्यासान् निजसम्प्रदायजीवातुभूतान्सुबहून् विषयांश्च पठित्वा प्रमोदभरमन्थरा अभूवन्मध्वमतानुयायिनस्तथान्येऽपि माध्वसिद्धान्तं ज्ञातुकामाः । प्रस्तुतनियतकालिके प्रकटितान्रङ्गाचार्याणां वैदुष्यप्रचुराँल्लेखान्समवलोक्य पञ्चाम्बु—(पंजाब)—विभागस्थितया चतुःसूत्रीवैष्णवसभया 'विद्याभूषणम्' इत्यनुगुणपदवीप्रदानेन सगौरवं सभाजिताः पण्डितप्रवरा रङ्गाचार्याः ।

मोहमयी (मुंबई) विश्वविद्यालयस्य 'एम्. ए.' परीक्षायाः, पुण्यपत्तनीयवेदशास्त्रोत्तेजकसभाया व्याकरणसाहित्यालङ्कारादिविषयाणां परीक्षासु पुनरसकृत्परीक्षकपदं समलमकार्षुः श्रीरङ्गीमहाशयाः । कतिपयसभानामपि सभापतिपदं निजलौकिकानुगुणं व्यभूषि विपश्चिदपश्चिमैरेभिः । तथा हि प्राय उपैकादशेभ्यः संवत्सरेभ्यः प्राग्भगवतो विश्वेश्वरस्य राजधान्यां श्रीवाराणस्यामखिलभारतवर्षीयपण्डितप्रकाण्डानामभूतपूर्वं ब्राह्मणमहासम्मेलनं समभूदिति विद्यत एव स्मृतिगोचरं भारतीयानां विदुषाम् । तस्मिन्महासम्मेलने विविधनिर्णेतव्यविषयान्यतमविषये धीमन्तो रङ्गाचार्या धुरीणतया सन्ति स्म । अल्पतरेभ्य एव वर्षेभ्यः पूर्वं पुण्यपत्तनेऽस्मिन् महाराष्ट्रभाषाव्याकरणमधिकृत्य विदुषां समितिरभूत् । तस्या अपि समितेरध्यक्षपदं शास्त्रिवरेण्या एव विभूषयाम्बभूवुः। अतीतेऽब्दे पुनरत्र पुण्यपत्तने संस्कृतभाषापुनरुज्जीवनपरिगृहीतदृढव्रताया गीर्वाणवाग्वर्धिन्याः सभायाः षष्ठवार्षिकोत्सवसमारम्भस्य रमणीयसंस्कृतवाक्प्रभावा रङ्गाचार्या एव मण्डयामासुरध्यक्षासनम् । महाभागेष्वमीषु प्रवदत्सु सकला अपि श्रोतारो धुन्वन्ति निजोत्तमाङ्गानि सपरितोषम् । अहो वाग्विभवः! यथा महाराष्ट्र्या तथा संस्कृतया वाण्या व्याख्यातुं विरला एव प्रभवन्ति । अथ ये प्रभवन्ति, तेषु प्रमुखतयोभयविधव्याख्यानपटीयसामेषां परिगणनं युक्ततममिति निःसन्देहम् ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

कामपि दयनीयां दशामनुभवन्तीं तपस्विनीं गीर्वाणवाणीमुज्जिजीविषुभिः कैश्चन विद्वद्वरैः १८३६ तमे शालिवाहनशकाब्दे श्रावणसुदि पुण्यपत्तने 'गीर्वाणवाग्वर्धिनी' नाम संस्था संस्थापिता। तत्र प्रमुखतयाऽऽसन् रङ्गी शास्त्रिणः। वहिश्चराः प्राणा इव तदानीमेते तस्याः सभायाः। सम्प्रत्यपि हि वैराजक्षेत्रे १८५६ तमे शा. वा. वत्सरे संस्थापिताया गीर्वाणवाग्वर्धिन्याः सभायाः कार्यभरः समुद्वहत एनैः।

संस्कृतलेखनमाधुरी पुनरेषामेकान्ततो रञ्जयति रसिकानामन्तरङ्गाणि। न केवलं संस्कृतलेखनकलायामेषां पाटवमपि तु कविभावेऽपि। विविधप्रसङ्ग-विरचितानामेषां संस्कृतकवितानां गणना प्रायः पञ्चशतीमपि स्पृशेत्! श्रीरङ्गीरङ्गाचार्याणां पद्येषु समुज्वला प्रतिभा, प्रसादगुणानुकुला पदरचना, हृदयङ्गमश्च रसपरिपोषः प्रतिपदं प्रतीयते।

पश्चिमे वयसि वर्तमानानामपि महाभागानामेषां मानसिकोत्साहो यत्सत्य-मतिशेते यूनामप्युत्साहभरम्। सम्प्रति श्रीरङ्गाचार्यपण्डिता एते विहित-विधेयाः समुपार्जितद्रव्या यापयन्ति प्रमोदभरपरिप्लुतमात्मीयमायुः। महीयान् खल्वेतेषां महाराष्ट्र—कर्नाटक—गुर्जरादिविभागेषु सहृदाप्तजनसमवायः। तत्तेषामभिलाषानुरूपं कदाचिद्वैराजक्षेत्रे, कदाचिद्गुर्जरदेशे, कदाचिच्च महाबळे-श्वरस्थाने निवसन्त्येते महाभागाः। तीर्थयात्रादिमङ्गलेनापि चान्तरान्तरात्मानं प्रमोदयन्ति। शास्त्रिवराणामेषां गभीरतरा ललिता चाकृतिः निरुत्सेकः स्वभावः, सहजविनोदमधुरो वाग्विलासः, सुहृत्प्रणयश्च, एवमादयो गुणाः सर्वथा वशीकुर्वन्ति सर्वेषामन्तरङ्गाणि।

श्रीरङ्गीरङ्गाचार्यशास्त्रिणो विन्दन्तु पुरुषायुषमित ऊर्ध्वमपि प्रणयन्तु प्रबन्धरत्नानि, विभूषयन्तु सभाध्यक्षासनानि, प्रमोदयन्तु सुहृदः, प्रहर्षयन्तु च सम्बन्धिन, इति सकलचराचरगुरोः शशिखण्डमण्डनस्य चरणसरोजयोः सप्रणयं विज्ञाप्य विरमामि। इति शम्।

....

गतश्रावणकृष्णैकादश्यां त्रिसप्ततितमेवर्षे पदं न्यधायि विद्वद्वरैर्मधुरवाणी प्राणायमानैः सुरसरस्वत्या असाधारणसेवादक्षैः रङ्गाचार्यैः इति प्रमोदपरवशै रस्माभिस्तच्चरित्रं प्राकाशि गुणगणाकृष्टहृदयैर्मधुरवाणीकर्तव्यताधिया।

— सहसम्पादकः

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

परस्परं पश्यन्तो लज्जिताः सन्तः क्षमां ययाचिरे। भर्तृमित्रेणाऽपि धनादिकं सर्वं तस्यै बालिकायै प्रत्यर्पितम्। राजा अपि बालिकाया इदं धाष्ट्यं प्रत्युत्पन्नमतिंच दृष्ट्वा महार्घं पारितोषकं वितीर्य तां तुष्टुवे। धनागमे सा बालिकाऽपि सुखेन कालं यापयामास। पुरातनाऽपि इयं बालिका परपुरुषाणामाक्रमणे कथं वर्तितव्यम्? अबलाऽपि बलं सम्पादितुं कथं समर्था भवति? इत्युपदेष्टुं अर्हा। अस्य सर्वस्य निदर्शिकां इमां बालां संस्मरन्त्यः सर्वा अबलाः महायुद्धेन जर्जरितेऽप्यस्मिन् काले स्वजीवनं सुखेन यापयितुं पारयेयुरित्याशास्महे।

मुख शुद्धीसाठीं

रजिस्टर्ड

वनस्पतीजन्य रुचकर आणि पाचक

चमन बा. किं. ५ आणे.

CHAMAN

डॉ. पी. सी. रॉय यांनीं सर्टीफिकेट दिलेले असून हजारो लोकांनीं वापरून पसंत केले आहे.

स्टार कंपनी बेळगांव.

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

सूक्तिसारावली

रचयिता—वेदव्याकरणसाहित्यधर्मशास्त्राचार्यः पं. चन्द्रदेवशर्मा पुराणतीर्थः साहित्यरत्नम्
बेतिया राजसंस्कृतविद्यालयाध्यापकः चम्पारण्यम् (बिहार)

(पूर्वतोनुवृत्ता)

कोपो महामत्तगजो न येषां स्वान्तं सरः सद्गुणपद्मशोभम् ।
बलाद् विलोड्याविलमातनोति सदात्मवत्ताराचितावरोधम् ॥ ३२ ॥

न लोभवात्यावलनामवाप्य येषां तृणायेत मनो बलाढ्यम् ।
नोन्मादयेत्कामपिशाचको यानन्तर्बहिर्भूरिविशुद्धिभाजः ॥ ३३ ॥

तृष्णाविषूची विशते न येषामन्तः सतां मर्मनिकृन्तनाय ।
निपीतविज्ञानरसायनानां मनो न येषामवसादनाय ॥ ३४ ॥

न मोहमात्सर्यपरम्पराली व्याली पदं हृत्सुषिरे विधत्ते ।
नोद्वेगहेतुश्च विषादवेगो येषां महायोगमुपागतानाम् ॥ ३५ ॥

बहिः प्रसक्ता इव लक्ष्यमाणा नान्तः प्रसक्तिं क्वचिदागता ये ।
समानयैवाऽऽमशकं दृशैतत्पश्यन्ति मैत्र्याऽखिललोकजालम् ॥ ३६ ॥

स्वच्छं सदाऽगाधतमं विशालं सरोवरं मानसमेत्य येषाम् ।
समन्ततः सद्गुणाराजहंसा नित्यं निरातङ्कमथोल्लसन्ति ॥ ३७ ॥

शमो दमः शौचमथार्जवञ्च धृतिः समा भूतदया तितिक्षा ।
एते विमुञ्चन्ति मनो न येषाम् त एव सन्तो जगतः शरव्याः ॥३७॥

निजप्रशंसाश्रवणेन सद्यः पद्मं निशायामिव सङ्कुचन्ति ।
गुणान् समाकर्ण्य सदा परेषां दिवा शरत्पद्ममिवोल्लसन्ति ॥ ३८ ॥

निरीक्ष्य सर्वत्र समुल्लसन्तं विभिन्नभावैर्भगवन्तमेकम् ।
निष्ठां परामेति मतिर्नु येषाम् सङ्गः सदा नोऽस्तु पदेषु तेषाम् ॥४०॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

दिवंगतानां संदेशाः स्वानुभवश्च.

(पं. जनार्दनशास्त्री गाडगीळ मुंबई)

अयि मधुरवाण्याः प्रियपाठकमहाभागाः प्रमोदतेतमां मे चेतः श्रीमद्भ्यः कस्मिंश्चिन्महत्त्वपूर्णे पुस्तके स्वकीयमभिप्रायं निवेदयितुम् । साम्प्रतं बहूनि पुस्तकानि प्रतिदिवसं प्रादुर्भवन्ति, यन्त्रयुगीनोट्टंकनसौकर्यात् लेखकानां च अकुतोभयत्वाच्च । परं तत्र किमस्माकम् । यस्मिन्विषये स्वीयमभिप्रायं निवेदयितुं साम्प्रतमहं प्रवृत्तस्तत्पुस्तकं खलु न सामान्यपुस्तकवद्, विशेषविषयत्वात् । सर्वेषामेव जनानां तस्मिन्पुस्तके संबन्धो वर्तते । विशेषतश्च सुरभारतीवर्धनबद्धपरिकराणां सनातनधर्मानुयायिनां च तत्र महानेव लाभो दरीदृश्यते । अत एव मधुरवाण्याः प्रियवाचकमहाशयानां चेतस्तत्र विषये सन्मुखीकर्तुं मदीयोऽयं यत्नः ।

प्रस्तुतप्रस्तावविषयीभूतस्य पुस्तकस्य नाम तु 'सहकारी दिवंगत आत्म्याचे संदेश' इति समन्वर्थकं वर्तते । अस्य षट्पञ्चाशत्पृष्ठात्मकस्य रमणीयस्वरूपस्य केवलं द्वादशाणकमात्रमूल्यकस्य पुस्तकस्य लेखकास्तु प्रथिततराः कृतविश्वसंचाराः परलोकविद्यापारंगतानां विश्वस्य विश्वेषां विदुषां सुपरिचिताः श्री. वि. दा. ऋषिमहाभागाः सत्यं 'महाराष्ट्रभाषाया उपरि निर्दिष्टं पुस्तकं प्रकाश्य अमरभारतीप्रचारकाणात् आर्यधर्मानुयायिनामुपरि महान्तमुपकारं कृतवन्तः इति विषये न संशयलेशावकाशः ।

अयि महाशयाः ! कथमुपकृतमनेन पुस्तकेन सनातनधर्मानुयायिनां पश्यत सिद्धान्तितमेवमस्मिन्पुस्तके ! अस्ति परलोकः । मृतमर्त्यास्तस्मिन्परलोके निवसन्ति । तत्र तैः सुखदुःखादिकमनुभूयते । मृतमुद्दिश्य मर्त्यलोके क्रियमाणं श्राद्धादिकं कर्म परलोके सुखकारकं भवति मृतस्य । अयि प्रेष्ठाः ! किं नानेन नास्तिकवादस्य मूले कुठारो निक्षिप्तः ? नच किमनेन सनातनधर्मस्य मूलमेव संवर्धितम् ? अयि वाचकवरेण्याः ! किमेतावता, इतोऽपि महत्तरं कार्यं संपादितमनेन पुस्तकेन । तच्चेदम्-पापं पुण्यं च वर्तते नवा वस्तुस्थित्या इति

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

साम्प्रतं पूर्वमपि च विवाद्यः प्रश्नः। अस्तिपक्षो हि 'धर्मस्य' मूलम्। नास्ति पक्षः प्राचीनाधुनिकसमस्तनास्तिकमतस्य मूलम्। विवदतां नाम आस्तिक नास्तिमतकोविदाः यावच्चन्द्रदिवाकरम्। परमस्मादृशैः किङ्करणीयम्? नास्माभिः पातकं द्रष्टुं शक्यते नच पुण्यम्। अस्माभिः कः पक्षः समाश्रयणीयः? एवं प्राप्ते 'ऋषिमहाभागाः' निश्चप्रचं समुद्घोषयन्ति—सर्वैरपि अस्तिपक्ष एव समाश्रयणीयः इति। तच्च न केवलं शाब्दप्रामाण्येन, नानुमानेन नचानुपलब्ध्या, नवा अर्थापत्त्या आपितु नास्तिकसम्मानितेन 'प्रत्यक्षप्रमाणेनैव'। ऋषिमहाभागैः 'पुण्यपापादिकं' वर्तते इति संसाधितं वर्ततेऽस्मिन्पुस्तके। संस्थापिते परलोकसत्यत्वे पापस्य पुण्यस्य च वस्तुस्थित्या सत्त्वे कियदुपकृतं भवति सनातनधर्मस्य तत्किं वर्णनीयम्?

यदुक्तमुपरि मया तत् श्रीमद्भिः ऋषिमहोदयैः स्वीये पुस्तके केषाञ्चित् मृतानां महाभागानां संवादद्वारेण संसाधितं वर्तते। न तत्र दम्भलेशोऽपि दरीदृश्यते। अहमेकदा ऋषिमहोदयानां प्रयोगस्थाने उपस्थित आसम्। किञ्च दारुमयी या काचन त्रिपादिका तस्याः उपरि मया एको हस्तः निक्षिप्तः। किञ्च मनसि मदीयायाः विंशतिवर्षात्प्राङ्मृतायाः मातुः साकं संवादः करणीयः इति आनीतम्। अल्पेनैव कालेन तस्यां त्रिपादिकायां कश्चन गूढात्मा सम्प्रविष्टः इति त्रिपादिकायाश्चालनेन प्रत्यक्षीकृतम्। सच गूढात्मा मदीयायाः मातुरेव आहोस्वित् अन्यस्य कस्यचित् इति प्रश्ने तया त्रिपादिकया अस्मन्मातुः नामाक्षराणि प्रदर्शितानि। वस्तुतः मदीयायाः मातुः नाम न ऋषिभिः परिज्ञातमासीत् नच अन्येन वा केनाऽपि तत्रस्थेन। ततः परं तया त्रिपादिकया मदीयानां प्रश्नानां सामीचीन्येन समुत्तराणि प्रदत्तानि। तद्दृष्ट्वा मदीयेऽपि मनसि सामीचीन्येन तत्सर्वं बद्धमूलं जातम् यद् ऋषिभिः अस्मिन्पुस्तके सिद्धान्तितं वर्तते।

अयि महाभागाः! पुस्तकेऽस्मिन् ऋषिमहाभागैः परलोकनिवासिनाम् ओकनामधेयानां केषाञ्चिन्महात्मनां संवादः विलिखितो वर्तते, तस्य वाचनेन श्रीमतां मनसि परलोकसत्यत्वविषये तथाच पापपुण्यविषये तथैवच उपासनादि-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

विषये महानेव प्रबोधः प्रादुर्भवेत् । धर्मशास्त्रेण यद्यत् प्रतिपादितं तत्सर्वं सर्वथा तथैव वर्तते इति अनायासेन सिद्धं भविष्यति ।

अयि सुरभारतीप्रणयिनः ! यन्मया पूर्वमुक्तम् पुस्तकेनानेन सुरभारती-वर्धनवद्धपरिकराणां महानेव लाभः सञ्जायत इति । तस्य कारणन्तु इत्थम् पुस्तकेऽस्मिन् पञ्चाशत्तमे पृष्ठे दिनचर्याप्रकरणे ओकमहोदयैः साकं जातः ऋषिमहोदयानां संवादः विलिखितो वर्तते । ओकमहोदयमुद्दिश्य कृतः प्रश्नः एवमासीत् । 'अयि महाभाग ! श्रीमतां परलोके क आचारः, कीदृशी दिनचर्या, भाषा, तत्रत्यनायकः कः' इति । तस्य प्रश्नस्य उत्तरं परलोकनिवासिभिः ओकमहोदयैः एवं प्रदत्तम् 'अयि बान्धव! अस्मत्परलोके यथा मृत्युलोके, तथैव सर्वे आचाराः वर्तन्ते, जपादिकानुष्ठानमपि सर्वैः करणीयं वर्तते एव । अस्म-न्नायकः गुरुः वर्तते, सच केवलं संस्कृतभाषयैव वक्ति । अयि बान्धव ! अतः अस्माकमत्र संस्कृतभाषा अवश्यमध्येतव्या भवति । यदि तदध्ययनं न क्रियते तर्हि गुरुभिः साकं वक्तुं न शक्यते ।

अयि मान्याः! पश्यत अमरभारत्याः सर्वलोकगामित्वम् । 'सत्यं खलु' अमराणां नाम देवानां भाषा अमरभाषा नाम । अयि मधुरवाणीपाठकाः ! किं नानेन सुरभारत्याः समुत्कर्षः संसाधितो भवति ? । अहं खलु मन्ये एतत्पुस्तकं सम्प्रकाश्य अन्वर्थकनामधेयैः ऋषिमहाभागैः सुरभारत्याः प्रचारे महदेवो-पकृतम् । नहि नहि तस्याः सुरभारतीत्वम् एव संसाधितम् इति मन्ये । अतः मधुरवाण्याः प्रियकाठकवरेण्येषु एवं सविनयं प्रार्थयामः—यत्किल श्रीमद्भिःतत् ऋषिमहोदयानां (सहकारी दिवङ्गत आत्म्याचे सन्देश) इति पुस्तकम् अवश्यं प्रपठ्य तथाच ऋषिमहोदयानां माध्यस्थेन स्वीयमृतात्मेन साकं संवादं कृत्वा पुस्तकप्रदर्शितप्रश्नानां अन्यानां च निश्चयः करणीयः ।

अन्ते ऋषिमहोदयेभ्योऽपि धन्यवादपुरस्सरं प्रार्थयामः—यत्किल श्रीमन्तः पुस्तकमिदम् अत्यन्तं महत्त्वपूर्णम् अमरभारत्यां प्रकाशयन्तु । इतिशम् ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

श्रद्धास्वरूपम् ।

(लेखकः—शंकर दामोदर पेशवे, साहित्यतीर्थ, सोलापूर.)

श्रद्धा नाम विश्वासः, ज्ञानं, सत्यं, कार्यतत्परता इत्येवंप्रकारेण "श्रद्धा" शब्दस्य बहुविधग्रन्थेषु विविधाः व्याख्याः विषयानुरोधेन व्यक्तिस्वभावानुरूपतश्च कृताः । मयाप्यत्र यद् विविच्यमानम् अस्ति तदनुसारतः "श्रद्धा" शब्दस्य व्याख्या दीयते यथा—

"वेदेषु गुरुवाक्येषु सत्यबुद्ध्याऽवधारणम्" ब्रह्मविद्याया उपदेष्टरि गुरौ तथाच वेदांतवाक्येषु यः सत्यमूलको दृढविश्वासो विद्यते स एव "श्रद्धा"

"त्रिविधा भवति श्रद्धा देहिनां सा स्वभावजा ।"

त्रिगुणात्मकेयं सृष्टिः श्रद्धात्रयात्मिकापि अस्ति । एवंच सर्वेष्वपि प्राणिषु स्वभावतः—जन्मनः प्रभृत्येव श्रद्धाया आविष्करणं भवति । एवंच मानवः श्रद्धावानस्ति । भवतु सात्विकश्रद्धावान्, राजसश्रद्धावान् उत तामसश्रद्धावान् । श्रद्धा तु ईदृशी सर्वसामान्या शक्तिर्या नैव विशिष्टबुद्धिमत्तायां वा विशिष्टस्वभावे वर्तते । परंतु सा तु सर्वव्यापिनी नित्या च । केवलं प्राक्संस्कारादियं श्रद्धा सत्वरजआदिभिन्नास्ववस्थासु दृश्यते इत्येव । सर्वेषां कृत्यानि स्वस्वश्रद्धानुसारत एव भवन्ति । परंतु केचिदाधुनिकाः पाश्चात्यशिक्षणविभूषिताः परंपरागतधर्मानुसारतो वर्तमानान्गतानुगतिकान्लोकानुपहसन्ति । परंतु न जानन्ति ते मन्दबुद्धयो यत्तेषां वर्तनं तु भिन्नसंस्कारानुसारत एव विद्यते इति । मानवस्य हृदि यादृशाः संस्काराः सञ्जातास्तादृशी एव तस्य श्रद्धा भवति, तादृशमेव तस्य मतं भवति, तदेव तेन प्रतिपाद्यते । अत एव भगवता श्रीकृष्णेन 'श्रद्धामयोऽयं पुरुषो यो यच्छ्रद्धः स एव सः' इति भगवद्गीतायां कथितम् । आत्मसाक्षात्कारार्थं यथा शमः, दमः, उपरतिरित्येतेषां दैवीगुणानां साहाय्यमत्यावश्यकं तथैव श्रद्धाया आनुकूल्यमपि साधकानामावश्यकमेव । इयं श्रद्धारूपिणी दिव्या शक्तिर्येषां हृदये विशुद्धसात्विकस्वरूपे सदैव जागृता वर्तते,

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

तेषां ज्ञानं भवति। तेन च तेषां शान्तिलाभोऽपि जायते। परंत्विदमत्र संस्मरणीयं यत्केवलं श्रद्धाबलान्मोक्षप्राप्तिरसंभवनीयैव।

"श्रद्धावान् लभते ज्ञानं तत्परः संयतेन्द्रियः" तत्परः संयतेन्द्रिय एव श्रद्धावान् ज्ञानं लभते, येन ज्ञानेन स मोक्षरूपामुत्कृष्टां शान्तिं समधिगच्छति। केवला श्रद्धा निरर्थकैव। सा तु तत्परता जितेन्द्रियत्वं च इत्येतयोः साहाय्यमपेक्षते। श्रद्धालुर्मनुष्योऽपि अलसः स्यादुद्यमहीनः स्यात्। तस्मात्—

"तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया।
उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः"।

इत्येवंप्रकारेण वर्णिता गुरुसेवाप्रणिपातादयो ये केऽपि ज्ञानावाप्तेरुपायाः शास्त्रेषु कथितास्तेषु साधकानां तत्परतोद्योगशीलता वाऽत्यावश्यकी। तथाचेन्द्रियनिग्रहः संयतेन्द्रियत्वमपि अतीवावश्यकम्।

पूर्वमेव मया "श्रद्धा" शब्दस्य व्याख्या "सत्यबुद्ध्याऽवधारणम्" इति कृता। एवंच दृढविश्वासः। परंच स दृढविश्वासः सत्यबुद्ध्यैव भाव्यः। संस्कारानुसारतो विचारस्तथैव निश्चयोऽपि भवति। अयं त्वन्तःकरणधर्मः। (मनोधर्मः) बुद्धिर्यदि स्वरूपतो निर्मला तथापि संस्काराधीना। तस्माद् बुद्धेर्भिन्नसंस्कारादेव भिन्नविचारा भिन्ननिश्चयाश्च दरीदृश्यन्ते लोकेषु। यदाकदाचित्सद्बुद्धेरभावाद्विवेकराहित्याच्च हतबलपुरुषाणां श्रद्धा मुहुर्मुहुः कम्पिता भवति, तदा विवेकेनैव तस्याः स्थिरीकरणं—दृढीकरणं कर्तुं शक्यते। विवेकाभावाद् यः कोऽपि विश्वासो, या काऽपि श्रद्धा वर्तते सा "अन्धश्रद्धा" इति शब्देन व्यपदिश्यते। काकतालीयन्यायेनेयमन्धश्रद्धा यदाकदाचित्सफलीभवति, परंतु नायं सर्वसाधारणो नियमः। यथा अक्षेत्रे कुक्षेत्रे वा उप्ताद्बीजात्फलनिष्पत्तेरसंभवस्तथा च वप्तुरपि परिश्रमा विफलीभवन्ति। तेनैव प्रकारेण विवेकाभावात् श्रद्धाया अपात्रे यत्स्थिरीकरणं भवति तेनायुषस्तथाच द्रव्यस्यापि हानिः सञ्जायते। अधुना केवलं स्वोदरपूर्तये साधुवेषं गृहीत्वा लोके व्यवह्रियमाणाः केचिन्मिथ्याचारिणः साधवो दृश्यन्ते। विवेकं विहाय केवलमन्धश्रद्धयैव—अंधविश्वासेनैव तेषां ये भक्ताः सञ्जातास्तैः सर्वैरपि एतदेवाचिरादनुभूयते। एवंच साधकेन न कदाप्यन्धश्रद्धा स्वीकरणीया।

'धर्म्यात् हि युद्धात् श्रेयोऽन्यत् क्षत्रियस्य न विद्यते'।

'तस्माद् युध्यस्व भारत' इत्येवंप्रकारेण भगवता श्रीकृष्णेनोप-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

दिष्टोऽर्जुनो न कदापि सहसैव प्रभुवचने श्रद्धधौ । कारणं तु हृदयदौर्बल्येन तस्य श्रद्धा मुहुर्मुहुः कम्पायमानाऽऽसीत् । अधोगतेर्मार्ग एव तन्मते उन्नेतर्मार्ग आसीत् । परंतु यदा ज्ञानेन विवेकेन च तस्य मनः सुसंस्कृतं सञ्जातम् , तस्य हृदये सत्यस्फुरणमभूत् , मनसः प्रक्षोभो विनष्टः, हृदि च समत्वं संप्राप्तं, तदैव तस्य निश्चयः सञ्जातः अन्तिमे श्रेयस्करे मार्गे । तदानीमेव तस्य सत्यमूला विवेकनिबद्धोज्ज्वला श्रद्धा प्रभुवचने सुदृढा संभूता । तदानीमेव **'नष्टो मोहः स्मृतिर्लब्धा' 'करिष्ये वचनं तव'** इत्युक्तं तेन ।

अस्तु ! अत्रेदमेव विशेषतः संस्मरणीयं यद् , यदा यथाशास्त्रं सत्तत्वविवेचनेनार्जुनस्य बुद्धेर्मालिन्यं प्रणष्टं, यदाच विकाररहितं सञ्जातं तस्य चेतस्तदैव प्रभुवचने तस्य श्रद्धा दृढमूलाऽभूत् । कस्मात्तर्हि शास्त्रानुसारतो विचारं कुर्वतां नराणां स्वनिश्चयविषये शंङ्काक्लेशोऽपि न वर्तते, यतस्तेषां निश्चयस्तु शास्त्रानुगृहीतः अत एव सत्योऽस्तीति । तस्मात्तेषामन्तःकरणे सर्वकार्यविनाशकस्य संशयस्य प्रवेशोऽपि न भवति । परंतु यस्तु अज्ञः, अश्रद्धालुर्नाम सत्श्रद्धाविरहितश्च तस्य स्थितिः कीदृशी वर्तते, तत्तु—

"अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यति" इत्येतेन भगवद्गीतायामेव वर्णितमस्ति । पूर्वमेव विवृतं मया, यत्साधकेन संयतेन्द्रियेण भाव्यमिति । एतद्विषये स्वल्पतया विचारयामः । श्रद्धा तु अन्तःकरणस्य धर्मः—मनोधर्म एव । शास्त्रोक्तकर्मानुष्ठानेन यदान्तःकरणं विषयेभ्यः सर्वथैव विमुक्तं भवति, तेनहि यदा च समस्थितिर्वा युक्तावस्था सञ्जायते तदैव सत्यमसत्यं, उचितमनुचितमित्येतद्विषये निर्णयक्षमा बुद्धिर्भवति । तदानीमेव श्रद्धाया अभीष्टे परमश्रेयस्करमार्गे च याथातथ्येन स्थिरीकरणं भवति नान्यथा । परंतु केचिदाधुनिकविद्याविभूषिता विद्वांसो **"न तदस्माकं बुद्धेः संमतं तस्माच्च वयं तस्मिन्विषये श्रध्दास्यामः"** इत्येवं प्रकारेण सोपहासं प्रलपन्ति । तान्प्रत्यस्माकमयं प्रश्नो यद् भोः ! युष्माकं बुद्धिः प्रथमं तावत् शास्त्राचारेण शुध्दा—सुसंस्कृता अस्ति किम् ? नो चेत् सा सुबुद्धिर्वा कुबुद्धिः ? स विवेको वाऽविवेकः ? । प्रवासार्थं निर्गतेन पथिकेन मार्गे मित्रमिति यदि चोरेण

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

सह संगतिः कृता स्यात्तर्हि काऽनवस्था जायेत, तद्विचार्यैव कल्पयन्तु भवन्तः ! अत एव भगवता गीतायामुपदिष्टम्—

'तस्मात् शास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ । 'ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहार्हसि' । शास्त्रोक्तवर्णाश्रमकर्मानुष्ठानेनैव चित्तशुद्धिः जायते, तेनहि कालान्तरेणेन्द्रियसंयमोऽपि साध्यते, येन चान्तःकरणे सदैव समता—योगस्थितिर्वा समुपलभ्यते । एवंप्रकारेण विद्यमानस्य संयतेन्द्रियस्य योगिनो बुद्धिरेव तस्य श्रद्धायाः संवर्धिनी भवति । 'नास्ति बुद्धिरयुक्तस्य भावना' 'न चाभावयतः शान्तिरशान्तस्य कुतः सुखम्' । अस्मिन्श्लोके अयुक्तस्य बुद्धिर्नास्ति इति यत् कथितं, तस्य मथितार्थस्त्वयमेव यदिन्द्रियदमनाभावे तस्य बुद्धिः सुखदुःखयोर्द्वन्द्वे सदैव निगडिता वर्तते, न सा कदापि स्थिरा भवति च । इयमस्थिरा बुद्धिरेव तस्य श्रद्धामप्यस्थिरां चञ्चलां च करोति । परंत्विन्द्रियनिग्रहिणो नरस्य बुद्धिः सुसंस्कृता विद्यते । तस्मात्तस्याः साहाय्येनाल्पकालादेव तस्यान्तिमयथार्थज्ञानस्य लाभो जायते। तत्रैव तस्य श्रद्धायाः स्थिरीकरणं, दृढीकरणं च भूत्वा तेनाचिरादेवात्मानन्द अनुभूयते । एवंच बुद्धेः साहाय्यादेव श्रद्धायाः सफलता पूर्तता च स्यात् । मोक्षसाधनार्थं यद्ज्ञानमावश्यकं, तदर्थं केवला श्रद्धा न कार्यकारिणी भवति, परंतु तत्परता, संयतेन्द्रियत्वं च नाम उद्योगः, इन्द्रियदमनंच इत्येतयोः साहाय्यमत्यावश्यकमपरिहार्यञ्च ।

तस्मात् श्रद्धान्वितेन मानवेनात्मसाक्षात्कारार्थं प्रथमं तावत् शास्त्रोक्तकर्मानुष्ठानं कर्तव्यं, तेन चात्मगतसामर्थ्यं—अन्तः—सामर्थ्यं संपादनीयं, येन च योगस्य संप्राप्तिः सञ्जायेत नाम अंतःसमता समुत्पद्येत । यया च तस्य श्रद्धोर्जस्वला भूत्वा कार्यक्षमा प्रभवेत् । एवंविधया श्रद्धया युक्ता एव श्रेष्ठा योगिन इति—

'श्रद्धया परयोपेतास्ते मे युक्ततमा मताः' । इत्येवंप्रकारेण ते वर्णिताः । एवंचैतादृशं श्रेष्ठतमं योगं संसाध्य प्राक्कर्मानुसारतो जन्मनाप्रभृत्येव संप्राप्तायाः स्वभावज—श्रद्धायाः सदनुकूलतां संपाद्यैव सर्वैरात्मोद्धारः कार्य इति चातुर्थपूर्णा किल योजनेति शम् ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

'हा! हन्त! हन्त! निरगाद्बुधसार्वभौमः'।

(ले. पुरुषोत्तमशास्त्री रानडे–पुणें)

हन्त ! भोः ! १८६४ शालिवाहनाब्दे आश्विनशुक्लपञ्चमी ललिताऽपि पुण्यपुरीवास्तव्यानां दुर्ललितैवाभासत । यतस्तस्मिन् दिवसे कल्पान्तदम्भोलिनिपातसदृशं प्रातरेवाकस्मात् 'महामहोपाध्यायाभ्यङ्करवासुदेवशास्त्रिवराः शिवस्वरूपतामगमन्' इति सचेतसां क्रकचेन हृदयं विदारयदिवामङ्गलवृत्तान्तवचनं कर्णपथं प्राप्तोन्नागरिकाणाम् । यदाकर्णनमात्रेणैव मुहूर्तं विचेतनमिव शून्यमिव शोकानलदन्दह्यमानमिव विषादपारावारविलीनमिवाभूद शेषमपि पत्तनमिदम् । केषांचन लोचनयुगुले समुदञ्चदश्रुसंकुले अभूताम् । केषांचन समुद्यद्बाष्पकण्ठानां वाक्प्रसर एव कुण्ठीभवति स्म । केषांचिदमन्दायत मस्तिष्कम् । हा केचन पुनर्मुखवैवर्ण्यभाजः पदात्पदमपि गन्तुं न प्राभूवन् । किं किं व्याहर्तव्यं तदानींतनपौराणामौदासीन्यम् । हन्त ! आस्तां तत्किमपि, परमवितथमेतद्यत्, सकलब्रह्माण्डैकप्रदीपस्तेजोराशिर्भगवान् सहस्रकिरणः प्रत्यहमस्तं यन्नपि पुनः प्रादुर्भवति । प्रतिकृष्णपक्षं क्षयिष्णुरपि शरद्राकानाथः सर्वथाऽमायां गच्छन्नपि दर्शनाभावं गच्छता कालेन प्रमोदयति संतप्तानां चेतांसि । प्रत्यब्दं विनश्यन्नपि ऋतुराड्वसन्तः सकलप्राणिसमाल्हादको मुहुर्मुहुः प्रत्यायाति । परं सरस्वतीकण्ठाभरणायमाना एते पण्डिततल्लजाः करालकालकवलीकृताः सकलवसुन्धरामूल्येनापि क्वापि केनापि नतरां शक्येरन् नयनसरणिगोचरीकर्तुम् । हन्त! शास्त्रिवरेण्यानामेषां परलोकगमनेन न केवलं पतञ्जलिगत्री, न वा पाण्डित्यं, नापि विद्वत्पण्डित्, सकलं सकलमपि विद्यावैभवं विलयमगात् । मातृविधुराणि बालकानीव दृश्येरन् समस्तान्यपि दर्शनानि । हन्त ! महाराष्ट्र ! अनाथो भवान् संवृत्तः ।

सहृदयाः! दुर्निवार्यत्वाद्भवितव्यतादुर्विलासानां, महानुभावानामेतेषां यद्यपि पाञ्चभौतिकं शरीरं स्वभावत एव विनश्वरमिति दृष्टिपथातिक्रान्तमभवत्तथाऽपि, पुनरपरमविनश्वरं यशःशरीरमाकल्पमपि जागृयात्तराम् । अतः पण्डितधौरेयाणा-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

मेतेषां संक्षिप्तं जीवनवृत्तं प्रकटयितुमभिलषामः । यतो महामहिमशालिनां चरितं नाम महोपदेशक एव ।

'अकलितमहिमानः केतनं मङ्गलानां
कथमपि भुवनेऽस्मिन् तादृशाः संभवन्ति' ।

आस्ति महाराष्ट्रप्रदेशे श्रीमतः शाहुनृपालस्य राजधानीति प्रथितं सप्ततन्तु (सातारा) पुरम् । तत्र चिरस्य खलु कालस्य निवसत्यभ्यङ्करकुलम् । तस्मिन् कुले सकलशास्त्रपारदृश्वानस्तोष्ट्रूयमानपाण्डित्याः श्रीभास्करशास्त्रिवरेण्याः स्वकीयपाठशालायां शास्त्रजातं पाठयन्तो न्यवसन् । एत एव वासुदेवशास्त्रिवराणां पितामहचरणाः । तदात्मजाः श्रौत्रियजेगीयमानयशःप्रकर्षाः श्रौतस्मार्तविधिकलापनदीष्णा महादेवभट्टाः पुनरेतेषां तातपादाः । तत्सहधर्मिणी पतिव्रतैकरत्नं श्रीमती दुर्गा नाम १७८५ शालिवाहनवत्सरेऽधिकश्रावणकृष्णपञ्चम्यां विनयमिव सद्विद्या पुत्ररत्नं प्रासूत । अमी एव प्रकृतवासुदेवशास्त्रिवराः । मानुष्यमुपागतो बृहस्पतिरिवायं शिशुर्निसर्गमनोहारिणीभिर्बालभावानुरूपविविधलीलाभिः सकलानपि कौटुम्बिकान् समनुरञ्जयन् परां किल कोटिं मन्देतरानन्दस्यानुभावयतिस्म ।

प्रियमहोदयाः ! जानन्त्येव श्रीमन्तो यद्, गुणानां सामग्र्यविधौ विश्वसृजः प्रवृत्तिः पराङ्मुखीति । तदानीतनं तत्कुटुम्बस्य परमप्रमोदभरमसहमानेनेव कालहतकेन शिशुभावमनुभवतोऽस्य पितृदेवौ महादेवभट्टः हठात्कारादिव कवलीकृतः । कष्टं भोः कष्टम् । सर्वकषा भगवती भवितव्यता नाम । का गतिः । पुत्रशोकानलेन–विशेषतो जरत्तमावस्थायां—विक्लवीभवताऽपि नान्तरीकतया गले पाशायितं वासुदेवलालनपालनादिकं यथावदनुष्ठितं पितामहेन । यथावसरमुपनयनमपि व्यधायि । गच्छता कालेन हन्त दिव्यसुखानुबुभूषयाऽऽकस्मिकतया देवलोकोऽपि स्वीचक्रे भास्करशास्त्रिप्रवरैः । परलोकगमनकालान्मनागिव प्राग्भास्करशास्त्रिवराणां पदवाक्यप्रमाणधुरीणाश्चरमच्छात्रप्रवरा माहुर्लक्षेत्रस्था गोडबोलेरामशास्त्रिणो निजगुरुवराणां भास्करशास्त्रिणां संनिधावुपेत्य तत्समयानुरूपमवोचन् यत्, 'अत्रभवद्भ्यः पूज्यपादेभ्योऽद्ययावद्य-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

ज्ञानामृतं समुपार्जि तदशेषमपि जैवातृकाय वासुदेवाय वितरिष्यामि, श्रीमद-भिलिषितानुरोधं च पाठशालायां विना वेतनलेशमपि च्छात्रानध्यापयिष्यामि। किं तया चिन्तया'। तदानीमिमे वासुदेवशास्त्रिवरा आसन्नववर्षदेशीयाः। अथ निजप्रतिश्रुतानुरूपं श्रीरामशास्त्रिगुरुवरैरपि सुतनिर्विशेषं प्रस्तुतमहामहानुभावा इतरेऽपि भूयांसश्छात्राः अध्यापिताः। एकविंशतिवत्सरान्यावत्सकलमपि शास्त्राध्ययनं परिपूर्णतामगात्! हन्त! धन्यतमास्तेऽधरीकृतवाचस्पतिवचोवि-न्यासास्तृणीकृतस्वार्था ज्ञानैकधना विद्यापीयूषवितरणैकगृहीतदीक्षा गुरुभक्तेः साक्षादवतारा एव पुञ्जा एव सद्धर्माचाराणां श्रीरामशास्त्रिनिभा गुरुचरण-तल्लजाः, श्रीवासुदेवशास्त्रिपुङ्गवसदृक्षाः सच्छिष्योत्तमाश्च। अहह! व्यतीतः स तथाविधः कालस्तथाविधो गुरुशिष्यभावश्च। तत्स्मरणमपि समुदञ्चयति सचेतसामङ्गेषु तनूरुहजालम्।

प्रेष्ठा! अतिरोहितमेवैतद्यत्, श्रीसरस्वत्योर्नैसर्गिकं मात्सर्यम्। जातेऽपि विविधशास्त्राध्ययने 'ततः किम्' इत्यनुयोगः श्रीवासुदेवशास्त्रिवराणां पुरत उदियाय। सर्वश्रुतचरमेवैतत्पद्यं 'बुभुक्षितैर्व्याकरणं न भुज्यते पिपासितैः काव्यरसो न पीयते। न च्छन्दसा केनचिदुद्धृतं कुलं हिरण्यमेवार्जय निष्फला गुणाः' इति। शास्त्राध्ययनानन्तरं स्वशाखाध्ययनमपि व्यधुः प्रकृतपण्डिता इमे। सत्यपीत्थं कुटुम्बपरिपोषणभरचिन्ता न किल मनागपि न्यूनतामापद्यत्। अहो नावगम्यते कदाऽपि केनापि अघटितघटनापटीयस्त्वं कालस्य। आनुकूल्ये हि विधेः किं नु नाम दुर्घटम्। तदानीन्तने काले सुगृहीतनामधेयो महामहिमशाली न्यायमूर्ती रानडेकुलललामो महादेवरायः पुण्यपुरमध्यवात्सीत्। श्रीरामशास्त्रिवर—महादेवराययोः सहधार्मिण्यौ परस्परं समानोदर्यौ भगिन्यौ। अतः खलु तयोरुभयोर्नैदिष्टः सम्बन्धः। 'अनर्घ्यं वा रत्नं न लसति विना काञ्चनमलम्' इति न्यायेन श्रीरामशास्त्रिगुरुवराणां चेतसि सच्छिष्यधौरेयोऽयं कथं नु नामानुरूपस्थानाधिष्ठितः स्यात्' इति-चिन्ताभर आसीदेव। युक्तं चैतत्। 'अतिमात्रभासुरत्वं पुष्यति भानोः परिग्रहादनलः। अधिगच्छति महिमानं चन्द्रोऽपि निशापरिगृहीतः'

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

इति कालिदासीयं तत्त्वं श्रीरामशास्त्रिगुरवोऽपि पुनरजानन्नेवं । शास्त्राध्ययन-परिमाप्तिसमनन्तरमेव १८०६ शालिवाहनसंवत्सरे पुण्यपत्तनस्थितवेदशास्त्रोत्तेजकसभायां कौमुद्यादिमहाभाष्यान्तानां ग्रन्थानां परीक्षायां युगपदेव तिसृष्वपि कक्षासु समुत्तीर्य प्रधानपारितोषिकं च संपाद्य लोकोत्तरं यशः समपीपदन्निमे । ततोऽब्दद्वयेन वटोदर (वडोदा) राजधानीस्थराजकीयविद्वत्परिषदि सकलशब्दशास्त्रस्य परीक्षणे नवनवोन्मेषशालिनं प्रतिभाप्रकर्षं प्रकटय्य सुबहुगौरवं प्रतिवार्षिकीं दक्षिणां महीयसीं च कीर्तिमविन्दन्तैते महाशयाः पण्डितवासुदेवशास्त्रिणः । एवंविधामार्हन्तीमेतेषां चेतसि निधाय जातुचिन्न्यायमूर्तिमहादेवरायसदनं प्रत्यागतैर्महर्षिकल्पैः श्रीरामशास्त्रिगुरुवरैः श्रीमहादेवरायसंनिधौ श्रीवासुदेवशास्त्रिवरयोगक्षेमविषयको विषयः प्रस्तुतः । तच्छ्रवणसमनन्तरमेव श्रीमद्भिर्न्यायमूर्तिभिः ' का वा विप्रतिपत्तिः प्रेष्यताम् ' इति व्याहृत्य निजसन्न्येव स्थापयितुमाकारिताः पण्डितमूर्धन्या वासुदेवशास्त्रिणः । तदनुरोधमष्टाविंशतिवर्षदेशीयाः शास्त्रिवरा अपि १८५३ शालिवाहनाब्दे सप्ततन्तुराजधानीतः समागत्य पुण्यामर्पामां पुरीं पावयितुकामा इव विभूषयितुमनस इवाध्यवात्सुः श्रीमतां महादेवरायसदनम् । ' भवन्ति वाचोऽवसरे प्रयुक्ता ध्रुवं फलाविष्टमहोदयाय ' इति कविकुलगुरोः काल्याः दासस्य वचोनुरोधेन वाचि वीर्यवतां गुरुवररामशास्त्रिवराणां वाक्सफलीबभूव । कतिपयदिवसापगमे विद्वज्जनैकपक्षपाती चतुरचेता न्यायमूर्तिमहादेवरायः ' हेम्नैव रत्नमिह संघटनाय योग्यमिति मनसि विधाय पुण्यपुरःस्थसंस्कृतपाठशालायां पण्डितवरानेतानध्यापकपदवीमधिकारितवान् । अहो ! अपि नाम महामहिमभाजां न्यायमूर्तिरानडेसदृशानां दुष्करम् ? । अल्पैरेवाहोभिः ' वार्ता च कौतुकवती विमला च विद्या ' इति जयदेवोक्तिवचोनुरोधेन महापण्डितानामेषां पठनपाठनचातुरीपरिमलो झगित्येव सर्वत्र प्रससार । अवितथमेवैतदुक्तं वाणेन यत् ' संपत्संपदमनुबध्नातीति ' । पाठशालाप्रवेशानन्तरं द्वितीय एव संवत्सरे ' प्रिन्सिपल वामन शिवराम आपटे ' महाभागानामाकालिकपरलोकयात्रया फर्ग्युसनमहाविद्यालये संस्कृतविषयाध्यापनविषयिण्यां महत्यां विप्रति-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

पत्तौ समुद्भुतायां 'प्राचार्य दि. त्र्यं. चादोरकर, प्रा. नां. स. पानसे, प्रा. गो. कृ. गोखले' इत्यादिमहोदयानां कार्यगौरववशात्स्वयंसमुद्भुतयाऽऽकाङ्क्षया १८१४ शालिवाहनाब्दे फर्ग्युसनाख्यमहाविद्यालये प्राध्यापकत्वेन न्ययोज्यन्त। तत्र तेऽसाधारणवैदुष्येण न केवलं छात्राणामपि प्राध्यापकानामपि प्राध्यापका इति सादरं सबहुमानं च सममन्यन्त। आसीत्तदानीं तेषां प्रतिमासं त्रिंशद्रूपकपरिमिता गुरुदक्षिणा। ततः प्रभृत्येव निजनैसर्गिकं मात्सर्यं दूरतरमुत्सार्य विचार्य च निपुणं प्राध्यापकप्रकाण्डेष्वेतेषु प्रणयमातेने कमला। गुरुवररामशास्त्रिमहर्षयोऽपि सच्छिष्यमूर्धन्यस्यास्य लोकोत्तरमुत्कर्षप्रकर्षं समवलोक्य परां किल कोटिमारुरुहुः प्रमोदस्य। शा० १८१४ तः १८५० तमं संवत्सरं यावत् फ० महाविद्यालयेऽध्यापिताश्छात्रास्तत्तद्विषये। सेवानिवृत्तिकाले १०५ रूपकात्मिका गुरुदक्षिणा प्रतिमासमभूत्। विश्रान्तिवेतनं च ५२॥ रूपकात्मकमासीत्। संस्कृतपाठशालायामपि महाभागैरेतैः शतशः छात्राः प्रपाठिताः। तेषु पं. दिगम्बरशास्त्रिकाशीकरप्रभृतयस्तत्र तत्र पाठयन्ति छात्रान्नैकविषयान्। नव्यच्छात्रेष्वपि कतिचन प्राचार्याः, केचन राजकीये महत्यधिकारेऽधिकारिणः प्रायः शतकचतुष्टयप्रमाणाधिकाः तत्र तत्र विद्योतन्ते। बहु व्याहर्तव्यमस्मिन्वस्तुनि। परं स्थलसंकोचान्न पारयामो यावदभिलषितं निगदितुम्।

पण्डितवराणाममीषां यथा महीयसी छात्रसंपत्तिस्तथैव विविधविषयप्रवृत्तिनिमित्ता ग्रन्थसंपदपि प्रमोदयति खलु सचेतसां विदुषां चेतांसि। तत्र कतिचनोल्लिख्यन्ते १ श्रीभाष्यटीका। २ सर्वदर्शनसंग्रहटीका। ३ मीमांसान्यायप्रकाश (आपदेवी) टीका। ४ सिद्धान्तबिन्दुटीका। ५ कुण्डार्कटीका। ६ यतीन्द्रमतदीपिकाटीका। ७ श्रीशाङ्करभाष्यस्य महाराष्ट्रभाषानुवादः। ८ पातञ्जलमहाभाष्यस्य महाराष्ट्रभाषानुवादः। ९ अद्वैतामोदः। १० कायपरिशुद्धिः। ११ श्री० भ० गी० आद्याध्यायद्वयटीका। १२ धर्मतत्त्वनिर्णयः (भागद्वयम्)। १३ सूत्रान्तरपरिग्रहविचारः। एते मुद्रिताः। अमुद्रिता अपि कतिपये तत्तच्छास्त्रीयग्रन्थटिप्पण्यात्मकाः सन्ति खलु भूयांसो

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

ग्रन्थाः । मुद्रितग्रन्थेषु श्रीशाङ्करभाष्यानुवादो वटोदर (बडोदा) संस्थानाधिपाभिलाषानुरोधमेतैः कृतः । एतद्भाष्यानुवादसंपादने प्राचार्यचांदोरकरमहोदयाः सहकारिणोऽभूवन् । परं तेषां ग्रन्थिज्वरेणाकस्मिकपरलोकगमनेनानुवादविषयकोऽशेषोऽपि कार्यभरः पण्डितैरेतैरेव समीचीनतया समाप्तिं प्रापितः । एवंत्वे वटोदरसंस्थानाधिपतितो लब्धाद्रूपकाणां पञ्चसहस्रात्सार्धसहस्रद्वितयं निजमानसिकौदार्येण प्राचार्य चांदोरकरसद्मनि प्रापयामासुः पण्डितवरा एते । तत्तद्ग्रन्थगतं तेषामलौकिकपाण्डित्यपाटवं साक्षात्कृत्य प्रमोमुद्यन्ते कृतधियां चेतांसि । सशिरःकम्पं च विदुषां वदनकुहरेभ्यो निर्गच्छन्ति साधुवादाः । 'अहो पाण्डित्यम्, अहो प्रतिभा, अहो विषयविवेचनचातुरी, अहो तर्ककर्कशमूलग्रन्थस्थितोहापोहान्दुरधिगमांश्च तत्तद्विषयानवगमयितुं प्रभवन्ती खल्वेतेषां लेखनमाधुरी' इति यान् ग्रन्थान्पुरोभागिनोऽपि प्रशंसं प्रशंसं प्रशंसन्ति । मन्यामहे यदेतेषां ग्रन्था देवनागरलिपिरूपमाश्रिताः श्रीमन्तो वासुदेवशास्त्रिण एवैते । कतिचन ग्रन्थांश्च स्थूलधियोऽपि यदि सुनिपुणमभ्यस्येयुस्तर्ह्येकान्ततोऽध्यापयितारं विश्रान्तिसुखमनुभावयेयुः । यथा सर्वदर्शनसंग्रहकुण्डार्कटीकादयः ।

१८४३ शालिवाहनवर्षे भारतराजैनेतेभ्यः 'महामहोपाध्यायः इति पदवीं वितीर्य पुनरेतेषामनितरसाधारणत्वं जोघुष्यते स्म । अपिच १८६० शालिवाहनवत्सरे श्रीसंकेश्वरपदाधिष्ठितैर्जगद्गुरुचरणैः 'विद्वद्रत्नम्' इति विरुदवितरणेन सभाजिता अमी विद्वल्ललामाः । सांगली–इचलकरंजी–मोर–औंधप्रभृतिषु संस्थानेषु श्रीमद्भिर्वेदशास्त्रसंवर्धनैकबद्धपरिकरैर्दानशौण्डैस्तत्तत्संस्थानाधिपतिभिर्बहुशः सत्कृतिसंमानादिभिः सदकारिपत सुगौरवभरं पण्डितचूडामणय इमे । वेदशास्त्रोत्तेजकसभा पतिभाव एतानेव सुचिरमाश्रयत, विविधशास्त्रीयविषयेषु परीक्षकाधिकारश्च । विश्वविद्यालयीयासु च 'बी. ए.' 'एम्. ए.' परीक्षासु व्याकरणवेदान्तसाहित्यादि विषयेषु सूरितल्लजा अमी परीक्षका भूरिशोऽभूवन् । विविधसंस्थानामध्यक्षासनं विशेषतः स्वधर्मविषये–नैकवारं बहुत्र चैतैर्धीमत्तरैरलमकारि ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

१८६० शालिवाहनहायने श्रावणकृष्णैकादश्यां विपश्चिदपश्चिमानामेतेषां वयसः षट्सप्ततिहायनाद्यनासरं व्याजीकृत्य सकलमहाराष्ट्रीयैरभूतपूर्वो मानपत्रराजततन्तुसमलंकृतमहावसनावितरणात्मकः सत्कृतिसमारम्भो महीयसोत्साहभरेण व्यधायि, यस्मिन् मन्त्रिपदाधिरूढाः पुरोगमाग्रेसराः 'बाळगंगाधर खेर महोदया अध्यक्षासनमलंचक्रुः । अभूतपूर्वश्चिरतरसंस्मरणीयश्चाभूत्स समारम्भमहोत्सवः, यत्र पञ्चाशत्षष्टिसंख्यातिगामिनीभिः संस्थाभिरहमहमिकया प्रकटीक्रियतेस्माऽऽदरातिशयः। प्राचीना नव्याश्च सत्कीर्तिमन्तो विपश्चिद्धुरीणाः सादरं सभक्त्युन्मेषं च सहस्रशः संमिमिलिरे । प्राचीनपरम्परया शिक्षितस्य विदुषो यत्सत्यं न दृष्टचरो नतरां श्रुतचरोऽपि समारंभो, यथायमेतेषाम् । तस्मिन्नवसरे निरभिलाषलेशं 'डेक्कनएजुकेशन सोसायटी' इत्यभिधायैसंस्थायै समर्पितस्य पातञ्जलमहाभाष्यस्यानुवादस्य प्रथमो विभागः प्रकाशतां प्रापितः । सेवानिवृत्त्यनन्तरमुत्तरे वयसि वर्तमानैरप्येभिः प्रगाढपाण्डित्यैर्महाभाष्यार्णवं स्वधियं मन्थानं विधाय तमामूलचूडाग्रं चाऽऽलोड्य समुद्धृतासिद्धान्तमहार्घरत्नानां हारं च संगुम्फ्य जनताजनार्दनस्य कण्ठप्रदश उपायनीकृत इति महदेतत्सौभाग्यं महाराष्ट्रीयाणाम् । महदेतत्प्रमोदस्थानम् । विरलविरलाः खल्वेतादृशो गभीरतरग्रन्थराजमनूदितारः ।

प्रियमहाभागा मधुरवाणीप्रणयिनः ! आवेदितं यथामति श्रीमतां लोकोत्तरसद्भाग्यजुषां शास्त्रिराजानां संक्षेपतो जीवनवृत्तम् । जानेतरां तच्छ्रीमन्तो मधुरयेयुरिति । महाभाग्यजुषामेतेषां श्रीवासुदेवशास्त्रिवराणामधिकारानुगुणौ विद्वत्तरौ सुधाधवलयशोभाजौ आत्मजौ एम्. ए. पदविभूषितौ प्राचार्यादिस्थानाधिकृतौ स्वस्वाधिकारपदे निवसतः। आशास्महे यत्तावपि निजपरम्परोचितामितोऽप्यधिकतरं कीर्तिं समुपार्ज्य पुरुषायुषं जीव्यास्तांतरामित्यलमङ्कुरितेन !

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

प्रहेलिकाया उत्तरम्

गर्तेऽके मधुरवाण्याः प्रियसुहृद्भिः काव्यालङ्कारभूषणैः शिंत्रेशिवराम-शास्त्रिमहोदयैः "केन संयुज्यते चन्द्र" इत्यादिपद्यत्रयेण प्रहेलिकाः प्रकाशिताः पुण्यपतनस्थानन्दाश्रमीयविद्वद्वराः रानडे पुरुषोत्तमशास्त्रिणः, धुळेनगरकृत-वसतयः पुराणनिष्णातकाव्यभूषणोपाधिभूषिता नरहरिशास्त्रिणः काव्यतीर्थ-व्युत्पत्तिकोविदाः कोवाडकरदामोदरशास्त्रिणः इचलकरंजपाठशालास्थाश्च, १ विजयपुरस्थश्रीमदानन्दतीर्थधर्मग्रन्थालयतो विद्वद्वरा उडुपीसीतारामाचार्या मंगळूर रामकृष्णशास्त्रिणो यलपूरवासुदेवाचार्याः नागरहळ्ळी रामाचार्याश्चापि, १ नक्षत्रेण युक्तः कालः २ नाभाव उपलब्धेः ३ अग्निमीळे पुरोहितम् इति प्रहेलिकाप्रदातृसम्मतान्येवोत्तराणि प्राहिण्वन् । काव्यतीर्थ श्री. शं. गो. वष्ट महोदयः प्रथमतृतीययोरुत्तरं प्राहिणोत् । मुंबईऋषि-कुलान्तेवासी बोरीवलीस्थश्चन्द्रात्रे दिनकरशर्मा प्रथमतृतीययोरुत्तरं यथावदेव प्रेष्य द्वितीयप्रश्नस्य "पत्यादिशब्देभ्यः" इत्याह वाचस्पति श्रीगुण्डेरावहरकारे डि. जज्ज गद्वालमहोदया अपि प्रथमतृतीययोरुत्तरं प्राहिण्वन् । अग्रिमांके उत्तरप्र-दानार्थम् एका प्रहेलिका श्रीकोवाडकरदामोदरशास्त्रिणा प्रदत्ता, अपरा च काव्य-तीर्थ श्रीवेंकटेशलक्ष्मणजोशीत्युपाव्हेन प्रेषिता । परमेकस्मिन्नङ्के एकस्या एव प्रकाशनमुचितमिति श्रीकोवाडकरस्यास्मिन्नंके प्रकाशिता । श्रीजोशीत्युपाव्हस्या-ग्निमाङ्के प्रकाश्यते । पंजाबदेशनिवासी मधुरवाणीप्रणयी गीर्वाणवाणीचरणसे-वापरायणः श्रीमान् जैनमुनिः श्रीज्ञानचन्द्रजीमहोदयः प्रश्नोत्तरक्रमः सौत्र एव, न विशेषतो बुद्धिवैशद्यकरः, अतः चेतश्चमत्कृतिकरः कश्चिदास्तामिति स्वाभि-प्रायमाविश्चक्रे । वयमेतद्विचारमपि स्वागतशब्देनाभिनन्दामहे । एतादृशाः प्रहेलिकास्ते उतापरे वा पुनरग्रिमाङ्केषु प्रकाशनाय प्रहिण्वन्तु । प्रियपाठकानां सर्वेभ्योऽपि प्रहेलिकानां तदुत्तराणांच प्रकाशनाय क्रमशः अवकाशप्रदैव मधुरवाणी सर्वदा इति । अग्रिमाङ्के ऊत्तराणि प्रकाशयितुं त्वरया प्रेषयन्तु-महाभागा इत्यभ्यर्थयामहे ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

प्रहेलिकाः

भूषणं भुजगः कस्य मानवस्य च किं तथा ।
पाणिन्याचार्यसम्मत्या सूत्रैर्दातव्यमुत्तरम् ॥ १ ॥
किमादितत्त्वं जगतो द्रष्टुं किं वा च साधनम् ।
सुखीभवति कस्मान्ना ब्रह्मसूत्रेण तद्वद ॥ २ ॥
पृथिव्युद्धारकः को वा सुहृदिष्टः कथंविधः ।
कः शब्दसाम्येलङ्कारो वदालङ्कार सूत्रतः । इति ॥ ३ ॥
किं कुर्वन् पतनं गच्छेत् भास्वान् कां प्राप्य दीप्यते ।
चन्द्रार्कौ कामाश्रयेते ऋक्पादेनोत्तरं वद ॥ ४ ॥
अभेदो जायते कस्मात् द्वितीया शक्तिरस्ति का ।
कोलंकारोऽपरार्थे च वदालङ्कार सूत्रतः ॥ ५ ॥

—कोवाडकरजोशी श्रीदामोदरशर्मा काव्यतीर्थः व्युत्पत्तिकोविदश्च इचलकरंजी, संस्कृतपाठशाला ।

अभिनवसंस्कृतप्रवेशः—भागत्रयात्मकोऽयं ग्रन्थः अथणीकलाशाला-ध्यापकैः एम्. ए. पदवीविभूषितैः श्रीदेशपांडेमनोहररावमहोदयैर्महता परिश्रमेण विरचितः स्वनामानुरूपं संस्कृतवाङ्मयप्रासादे अभिनवतया प्रविविक्षूणां विद्यार्थिनां सुलभप्रवेशाय प्रदर्शयत्यभिनवं पन्थानम् । सुखेन प्रवेश्य क्रमेण नयति चान्तःपुरम् । तथा सरसया सरण्या, सुलभया शैल्या सुगमया गहनानामपि व्याकरणनियमानां विवेचनरीत्या उद्बोधकैः स्फूर्तिप्रदैः स्वाभिमान-पोषकैश्चोदाहरणैरेवमादिनाऽन्तरङ्गसौकुमार्येण, तथा सुन्दरैर्वर्णैः सुललितैः पत्रैः श्लक्ष्णेनावरणपृष्ठेन मुद्रणेन चेति बाह्याङ्गसौष्ठवेन ग्रन्थकर्तेव नितरां मनोहर एव सर्वात्मनाऽयमिति नातिशयोक्तिरियम् । तदिदं पुस्तकं शिक्षका विद्यार्थिनश्च समादृत्य सफलीकुर्वन्तु कर्तुः परिश्रमं इत्याशास्महे । मूल्यं-प्रथमस्य भागस्य द्वादशाणकाः, द्वितीयस्य रूप्यमेकं, तृतीयस्य सपादरूपकमिति ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

श्रीशः शरणम्

नव्यवत्सरारम्भः

'नव्याब्दो नलिनाक्षदिव्यकृपया भव्याय भूयात्सदा'

भगवतः कमलाप्रेष्ठस्य सकलेष्टपूरकस्य निखिलरिष्टनिवारकस्य विष्टरश्रवसः कृपादृष्ट्या, वाचकजलमुचां करुणारसवृष्ट्याच बाला मधुरवाणी अद्य अष्टमवत्सरपदे पदं न्यधादिति परां काष्ठामधिरूढाः स्मो वयं प्रमोदभरस्य । सर्वतो भीषणतमेऽस्मिन् समये सुरवाणीप्रणयिनां सुरतरुसतीर्ष्यानामुदारचेतसां वाचकमहाशयानामप्रार्थितप्रसादकृतां च यदि नाभविष्यत्कृपावृष्टिस्तर्हि निष्किञ्चना वत्सा मधुरवाणी अष्टमवर्षे दृष्टिमपि निक्षेप्तुं न प्राभविष्यत्कथमपि । सप्तमवर्षेऽनुभूतानां कष्टानां वर्णनेन किं वा फलम् ? । ततः प्रार्थनाशतेनाऽपि अननुद्रुतचेतसां विश्वस्तजनकृच्छ्रदशां मनसाऽप्यनाकलयतां वज्रसारीकृतहृदयानां केषांचन महानुभावानां (?) चेतसि नानुकूलः परिणामोऽभूत् भवति भविष्यति वा । तान् प्रार्थं प्रार्थं नितान्तं श्रान्ता वयमेव लज्जिता तूष्णीम्भावमेव प्रपन्नाः स्मः । ये तु मधुरवाण्यामनितरसाधारणमव्याजं प्रणयगरिमाणमावहन्ति यथार्थतो महानुभावास्तेषां पुरतः समनुभूतविपत्तिमनुवर्ण्य स्वयमेवोह्या परिखिन्नं कुसुमसुकुमारं मानसं पुनः परिदूय न कार्कश्यदोषेणात्मान मुपलिम्पितुमभिलषामः नापि सर्वं विद्वत्सु विचारविचक्षणेषु तेषु असम्भवनीयमूहाशक्तिवैकल्यमारोपयितुं दध्मो धार्ष्टर्यम् । यत्किमपि वा अस्तु । कथमपि वा आपदमुत्तीर्य नव्यवत्सरे नवोत्साहेन वत्सा मधुरवाणी सुरवाणीसेवायां दृढबद्धपरिकरा सन्नद्धेत्येव वाचकानामिवास्माकमपि प्रमोदावहमेवेदम् । तदस्याः समुत्साहकृतसाहसं वाचककृपामात्रावलम्बीति नेदं परोक्षं प्रेक्षावताम् । अतः कृपालुभिर्वाचकैर्नववत्सरे नवग्राहकसंग्रहेण प्रतिव्यक्ति मूल्यतोऽधिकाधिकं, अन्ततः एकमपि रूप्यं प्रदाय चिन्ताशतव्याकुलां मधुरवाणी समाश्वासनीया प्राणनीया चेति प्रणयिनः सौहार्दसहजेनात्मीयभावेन सादरं प्रार्थयामः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

सप्तमवत्सरे मधुरवाणी प्रियवाचकचेतांसि कथमन्वरञ्जयदित्यत्र रसिका एव साक्षिणः। सेयं "विबुधसन्देशे"न समनन्दयद्वाचकवृन्दम्। 'सुरभारतीविलासे'न समुदलासयन्मानसम्। समन्वरञ्जत्सरसतरकथाभिः सहृदयचेतांसि। 'विनोदमोदकामोदेन' सममोदयदमन्दमेव। चमत्कारच्छटाभिरपूर्वमिव चमत्कृतिमजनयच्चेतसि रसज्ञानाम्। अनेन हासरसमयेन लेखद्वयेन संस्कृतवाङ्मये नवीनैव सरणिरुपाक्रमि। दूर्थकारि संस्कृतवाङ्मये हासरसन्यूनतादोषारोपश्च। तथा विद्वन्मणीनां श्रीदीनानाथशास्त्रिमहाभागानां च लेखेषु विषयमहत्त्वं, भावगाम्भीर्यं, तलस्पर्शिता, प्रतिपक्षमुखमुद्रणपाटवं चेत्येवमादयः परिस्फुरन्तो गुणा द्विगुणतां समुदपादयन् प्रमोदस्य। 'प्रसन्नहनुमन्नाटकं' तु नवसरणिमवलम्बमानमपि अनुज्झितप्राचीनपथं नितरामवर्धयत्संस्कृतनाटकप्रथाम्। तदेवमुपकृतवत्सु प्रथिततमेषु विद्वल्लेखकेषु नितरां कृतज्ञतामावहति मधुरवाणी। एतेषां विद्वद्वराणां सरसतमा लेखा नवीनवर्षे मधुरवाणीमलङ्करिष्यन्तीति वाचकान् समाश्वासयामः। 'क्षीरे शर्करेव' वत्सरेऽस्मिन् वैदुष्येण समुपान्यासेन च दिक्षु प्रथितयशसां श्रीशङ्कराचार्यपीठमलङ्कुर्वतां श्रीकुर्तकोटिकर्मन्दीश्वराणां नवविचारपरिप्लुतो भावगभीरः स्फूर्तिझरीप्रभवः पद्यमयो लेखो हृद्यतां पुष्णाति मधुरवाण्याः। एते किल महाभागाः मधुरवाणीं स्वविचार–धनबलसाहाय्येन निरवद्यां, नव्यमार्गदर्शिनीं, प्राचीन–नव्यसंस्कृतिसन्धानपटीयसीं, सर्वात्मना सर्वादरणीयस्वरूपां कर्तुमभिलषन्ति। 'किमसाध्यं महात्मनाम्'?। एवं च नववत्सरे नवलेखालङ्कारा, पुराणलेखाधिष्ठितां स्वर्भूमिमपहसन्ती, सुरसरस्वती सेवमाना विबुधप्रिया च मधुरवाणी वाचकमनो विनोदयेदिति नो दृढीयान्विश्वासः।

विशेषसाहाय्यकृतां महात्मनां सुगृहीतनामधेयान्यप्रकाश्य स्थातुमशक्नुवती तदुपकारभरावनता मधुरवाणी तेषां विमलनामाक्षरमुक्ताफलैरात्मानमलङ्करोति धन्यतां दधाना सप्रणयं सरोमाञ्चं सानन्दबाष्पं सावनतशीर्षं सादरं च एकदा समयमवलंब्य चाग्रिमांकेषु। अन्येऽपि अमरवाणीप्रणयिन एतानेव महनीयचरिताननुकृत्य देवगवीप्रचारसुकृतं, मधुरवाणीजीवनश्रेयः समुदारताप्रभवं यशः, धनसद्विनियोगोदाहरणचातुर्येण परेषां सत्पथप्रदर्शनमहती च सममेव समार्जयन्त्विति वाढमभ्यर्थयामः।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

नियमावलिः

(१) मधुरवाणीनाम्नीयं संस्कृतपत्रिका प्रतिमासं पौर्णिमायां प्रकाशते.

(२) अस्यां प्रायः प्रत्यङ्कमेका लघुकथा, सनातनधर्मविषयकः प्रबन्धः प्राचीनसाहित्यं चान्ये प्रचलितविषयका विवेचनात्मका लेखाः प्रकटीक्रियेरन्। सनातनधर्मद्रोहिणो लेखा नावकाशं विन्देरन्। ग्राहकेतरेषां लेखाः पद्यानि वा न प्रकाश्येरन्।

(३) पत्रिकाया अस्याः अग्रिमदेयं मूल्यं मार्गव्ययसहितं रूपकपञ्चकम्। अङ्कस्यैकस्याणकाष्टकं मूल्यम्। द्वीपान्तरवासिनां तु वार्षिकं मूल्यं सप्तरूप्यात्मकम्। विना मूल्यमादर्शसञ्चिका न प्रदीयेत। तदिच्छुभिश्च आणकाष्टकमूल्यानि शुल्कपत्राणि प्रहीयन्ताम्।

(४) मधुरवाण्याः श्रेयोभिवृद्धये दशरूपकाणां दातारः सहायकाः, पञ्चविंशतिरूपकप्रदाः पोषकाः, पञ्चाशद्रूप्यकदायिनोऽनुग्राहकाः शताधिकप्रदा संरक्षका इति व्यपदिश्येरन्।

(५) मधुरवाण्यां नीरसा असुवाच्याक्षरा एकपार्श्वे एवालिखिता लेखाः नावसरमासादयेयुः। लेखपरिवर्तनादिषु निरनुयोज्याधिकाराः खलु संपादकाः। अप्रकाशिता लेखा विना प्रापणव्ययं न प्रतिप्रहीयेरन्।

(६) लेखा, विज्ञापनानि, समलोचनापेक्षिणो ग्रन्थाः, पत्रिकाश्चेत्यादिसकलं मधुरवाणी कार्यालय बेळगांव देशपांडेगल्ली नं.१४५८ इति संकेतेन प्रेष्यम्।

पत्रं मूल्यधनं वा प्रेषयद्भिः निजसंकेतादिकं देवनागरीलिप्यैव सुस्पष्टं विलेखनीयम्। भूतपूर्वैर्ग्राहकैः पत्रस्य धनस्य वा प्रेषणसमये ग्राहकसंख्यालेखनं नैव विस्मरणीयम्। उत्तरप्रेप्सुभिरवश्यं प्रेषणीयः प्रापणव्ययः।

प्राप्तिस्थानम्

मधुरवाणी कार्यालय, देशपांडेगल्ली १४५८ बेळगांव.

Printed at Veer-bharat Printing Press, Belgaum. by its propritor A. P. Chougule and Published by R. N. Galgagli at Hous No. 1458 Deshpande Galli Belgaum.

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

Regd No. B. 3634.

PINK
NTMENT

४ तासांत बरी होते

क मलम

रुण्यपिटिका (मुरुम), डोक्यांतील फोड
इसब व त्वचारोगांसाठीं
सुगंधीत मलम

यानें कपडे खराब होत नाहीं.

मर्क्युरी, कॅम्फराझिंक आणि म्हैसूर चंदन तेलांत
बनविलेले

पिंक मलम

स्टार कंपनी, बेळगांव.

Sri Jamalu, B.V. Acharyacharya.
Vidya Bhoosham, Vidya Dhuram.
At-Po:- Melukote.
Via:- Tonnur Raks.
Mysore State.

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.